3 A ०संज्ञा न पुन नगरसंज्ञा

4 A & B & Tib. add here ये बोधिसत्त्वाः प्रतिष्ठितु धारणीये ।

5 A & B & Tib. add here
न मानसंज्ञा न पुनरमानसंज्ञा नो विग्रसंज्ञा न पुनरविग्रसंज्ञा ।
नो दृष्टिसंज्ञा न पुनरदृष्टिसंज्ञा ये बोधिसत्त्वा प्रतिष्ठितु धारणीये ॥

6 B adds च

7 A ०ध्याने न पुन तेऽभिनिविष्टाः ; B ध्यान च पुन ते नि०

त्रैधातुके ते प्रजहित्व[1] दोष सर्व
ये बोधिसत्त्वाः प्रतिष्ठितु धारणीये ॥७५॥
नो रागरक्ता न च पुन दोषदुष्टा[2]
नो मोहमूढ़ा अशठ[3] भवन्ति नित्यम् ।
दृष्ट्वा च बुद्धा दशबल[4] सत्करोन्ति
नो चापि स्वर्गं मतिधर[5] प्रार्थयन्ति ॥७६॥
तेषां श्रुत्वा परत विशिष्टधर्मं[6]
नो भूय तस्मिन् भवति कदाचि काङ्क्षा[7] ।
तैलस्य पात्रं यथरिव अच्छ शुद्धं
[च्छेदा]च्छेदं पर-मत ते[भि] ज्ञातम्[8] ॥७७॥

1 B & C प्रविजहि ; Tib. 216b, l. 6:
ཁམས་གསུམ་ཉེས་པ་ཐམས་ཅད་རབ་སྤོང་ས །

2 दोष here as also in stanzas 74,77 mean द्वेष = ཞེ་སྡང ། But in stanza 75, it means "evil," see above Tib. rendering

3 B असत 4 B दृष्टा च पुनर्बुद्धान् , C बुद्धा नृबल

5 B स्वर्गा स्मृतिधर

6 A येषा श्रुणित्वा परम विशिष्ट धर्मा नो भयु ; B तेषां श्रुणित्वा पुरतु विशिष्टां नो भूय ; Tib. 216b, l. 7: སུ་དག་གཞན་ལས་ཆོས་མཆོག་ཐོས་ནས་ནི །

7 Tib. 216b, l. 7: ནེམ་ནུར །

8 B यथरिव अच्छ शुद्धस्य रमतु तेहि ज्ञातः। Tib. 217a, l. 1:
འབྲུ་མར་གང་བའི་སྣོད་གཞིན་དང་ཞིང་དག །
བཅད་དང་མ་བཅད་གཞིན་གྱི་བློ་ཡང་ཤེས །

स्नेहं कुर्वतु[1] जायते अनुनयः सोऽपी किलेशो महान्
दोषं कुर्वतु[1] जायतेऽस्य प्रतिघो वैरं[2] भयं पापकम् ।
द्वावेतौ विजहित्वना[3] मतिधरा बोधाय ये प्रस्थिताः[4]
ते भोन्ती[ह] नरर्षभा दशबला लोके समभ्युद्गताः[5] ॥७८॥
अध्यात्मं प्रजहित्व बाह्यमपि चो धर्मस्वभावे स्थिताः·
शीलस्कन्धु विशोधितो अशबलो अखण्ड अच्छिन्द्रितः[6] ।
ना वा तेषु[7] कदाचि शीलशवलं नो चापि कल्माषता
द्वावेतौ[8] परिवर्जिया मतिधरा बुध्यन्ति बोधिं शिवाम्[9] ॥७९॥

1 B कुर्वन्तु
2 A प्रतिघोरं
3 B प्रजहित्व
4 A बोधय संप्रस्थिताः ; B प्रतिस्थिताः
5 B सदाभ्युद्गताः
6 Tib. 217a, l. 4: རལ་བ་མེད་ཅིང་མ་འདྲེས་སྐྱོན་ཡང་མེད། །
7 B नो चो तेष
8 B द्वावन्तो
9 A & B & Tib. 217·8 add—अथ खलु राजा शूरदत्तो भिक्षुसंघसकाशात् सुपुष्पचन्द्रस्योदारोदारान् महागुणविशेषान् श्रुत्वा दुःखितो दुर्मनास्तस्यां वेलायां महाबोधिसत्त्वगणं गाथाभिः प्रत्यभाषत ।

समन्तभद्रं वनषण्डगह्वरं महानगाकीर्णं फलोपशोभितम् ।
सर्वर्त्तुकालापगु-पुष्पमण्डितं नानाविचित्रैर्विहगैर्निनादितम् ॥
रुचिरैश्च तुङ्गैश्च विशालपर्वतैरुपशोभितं किन्नरिणां च गीतैः ।
सुविधानयुक्तैश्च मनोज्ञवाद्यैः सदा सनृत्याभि च सिद्धकन्यकैः ॥
वनं च देवान यथैव नन्दनं सुरूपरूपोज्ज्वलवृक्षसंकटम् ।
विचित्रनानाविधपुष्पसन्ततं पद्मोत्पलैराचित वारिणा युतम् ॥
एतादृशं वनवरु प्रेमणीयं ऋषीण अनुकूल सदाधिवासम् ।
उत्सृज्य तं यत्सत्त्वहितार्थकामो आयातु राष्ट्रं मम पापराशेः ॥
एमेवयं गुणधर धर्मभाणको सुपुष्पचन्द्रो इह नगरीं प्रविष्टः ।
प्रविष्टु सन्तो मयि हतु पापकारिणा यदेतु हत्वा अहु निरयं गमिष्ये ॥
ये बोधिसत्त्वाः करुणबलेनुपेता विचरन्ति लोके सत्त्वहिताय शूराः ।
त्रायन्तु ते मामशरण पापकारिण शरणं च यामी तामहु बोधिसत्त्वान् ॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत[1] ।

अहं स पूर्वे चरमाणु चारिकां
राजा अभूवं तद शूरदत्तः ।
रतनावती[2] नाम स राजधानी
उद्यानभूमिर्यतु[3] निष्क्रमामि ॥८०॥
रथाभिरूढास्तद दृष्ट्व[4] भिक्षुं
समन्त प्रासादिकु दर्शनीयम् ।
द्वात्रिंशता कवचितु लक्षणेभि-
रोभासयन्तं दश दिशता समन्तात् ॥८१॥

ये चापि प्रत्येकजिनाद्वितीया ये चापरे श्रावक ऋद्धिमन्तः ।
क्षीणास्रवा अन्तिमदेहधारिणस्त्रायन्तु ते मां दुःखितमवीचिंगामिनम् ॥

तत्र भगवान् पुनरपि आयुष्मन्तमानन्दमामन्त्रयते स्म । तस्मात्तर्ह्यानन्द कायजीविताऽनध्यवसितेन बोधिसत्त्वेन महासत्त्वेन भवितव्यम् । तत् कस्य हेतोः । कायजीविताध्यवसितानां ह्यानन्द सत्त्वानां अकुशलकर्माभिसंस्कारो भवति । तत्रेदमुच्यते ।

अध्यवसिता ये सत्त्वाः कायेस्मिं पुतिके सदा ।
जीविते चञ्चलेऽवश्ये मायास्वप्ननिभोपमे ॥
अतिरौद्राणि कर्माणि कृत्वा मोहवशानुगाः ।
ते यान्ति नरकान् घोरान् मृत्युयाने गताबुधाः ॥
फेनपिण्डोपमे काये जीविते बुद्बुदोपमे ।
निरपेक्षा ये मनुजास्ते यान्ति परमां गतिम् ॥

तत्र भगवान् पुनरप्यायुष्मन्तमानन्दमामन्त्रयते स्म । तस्मात्तर्ह्यानन्द बोधिसत्त्वेन महासत्त्वेनेमं समाधिमाकाङ्क्षता क्षिप्रं चानुत्तरां सम्यक् संबोधिमभिसंबोद्धुकामेन कायजीवितनिरपेक्षेण भूत्वा आदीप्तशिरश्चैलोपमेनारब्धवीर्येण सत्त्वानामन्तिके महाकरुणाचित्तमुत्पाद्य प्रविवेकसुखविहारारण्यप्रारण्यांश्चोत्सृज्य ग्रामनगरनिगमजनपदराष्ट्रराजधानीकर्वटकेष्ववतरित्वा सत्त्वानां तथा धर्मो देशयितव्यो यथा ते अवैवर्तिका भवेयुः । श्रावकबोधौ प्रत्येकबोधौ वा अविवर्तनीयाश्च ते भवेयुरनुत्तरायाः सम्यक् संबोधेरिति ।

1 A & B वेलायामायुष्मते आनन्दायेदमेव पूर्वयोगकथानिर्देशं भूयस्या मात्रया गाथाभिगीतेन विस्तरेण सम्प्रकाशयति स्म । 2 A & B रत्नावती
3 A ०मी यतु ; B ०मिं यतु ; यतु for यत्र 4 B ०रूढस्तद दृष्ट

सुपुष्पचन्द्रो दिशता सुविश्रुतो
हितानुकम्पी करुणाविहारी ।
सत्त्वानुकम्पी नगरं[1] प्रविष्टः
शिरीय तेजेन च शोभमानः ॥८२॥
अहं च रूपेण न तादृशोऽभवं[2]
मात्सर्यमुत्पन्नु सुभैरवं मे[3] ।
कामेषु गृद्धो ग्रथितश्च राज्ये
मा एष राज्यान्मम[4] च्यावयेत ॥८३॥
पुत्राण संपूर्ण सहस्र मह्यं
रथानुरूढा अनुयान्ति[5] पृष्ठतः ।
विचित्रमुकुटाभरणा[6] विभूषिता
यथ देव पुत्रास्त्रिदशेन्द्र यान्ति ॥८४॥
दुहितृण तस्मिञ्छत[7] पञ्च मह्यं
मणिपादुकारूढ सुदर्शनीयाः ।
[8]आबद्धमुकुटाभरणा विभूषिता-
स्ते [हे]मजालै रथु ते वहन्ति ॥८५॥
स्त्रीणां सहस्राणि अशीति मह्यं
प्रासादिकाः सर्व[9] सुदर्शनीयाः[10] ।

1 A सत्त्वे हितार्थं नगरं
2 B भवेत्
3 C ०मुने
4 B राजन् मम
5 A रथाभिरूढ् अनुयाति ; B रथाभिरूढा अनु०
6 B विचित्रमुक्ताभरणा
7 C पुत्राण तस्माच्छत
8 A & B आरब्धमुकुटा०
9 B सर्वि
10 A drops the four lines from आबद्ध to सुदर्शनीयाः

रथाधिरूढाः[1] समुदीक्ष्य भिक्षुं
प्रासादिकं मेरुमिवोद्गतश्रियम्[2] ॥८६॥
दृष्ट्वा च तासां पितृसंज्ञ जाता
उत्पादितं चित्त वराग्रबोधये।
समादयित्वा[3] तद ब्रह्मचर्यं
क्षिपिंसु तानाभरणान्मनोरमान् ॥८७॥
ईर्ष्या ममोत्पन्नु अभूषि[4] तत्क्षणं
व्यापाददोषश्च खिलं च दारुणम्।
ऐश्वर्यमत्तश्च वदामि पुत्रान्
घातेथ भिक्षुं स्थितु यः पुरस्तात् ॥८८॥
श्रुत्वाथ ते मह्य[5] कुमार वाक्यं
सु[दुः]खिता दुर्मनसो अभूवन्।
मा एव प्रव्याहर तात वाचं[6]
[न] घातयामो वय भिक्षुमीदृशम् ॥८९॥
यद्यङ्गमङ्गात्तु शरीर[7] छिद्येत्
कल्पान कोट्यो यथ गङ्गवालुकाः।
न त्वेव भिक्षुं वय हिंसयेम
तथाहि बोधाय उत्पन्नु चित्तम्[8] ॥९०॥

1 A & B रथाभि० 2 A मेरुमिवोर्ण्तश्रि० ; B ०को मेरुमिवोद्गतश्रियः
3 B & C समादनित्वा 4 A ०पन्नमभूषि ; B मनोत्पन्न अभूषि
5 A & C ते तस्य ; Tib. 219a, l. 6: ང་ཡི་ཚིག ། 6 A वाक्यं
7 A यद्यङ्गसगस्मि सरीरु ; B यद्यङ्गसङ्गंपि शरीरु ; Tib. 219a, l. 7:
བདག་ཅག་ལུས་དང་ཡན་ལག་བཅད་གཏུབས་ཀྱང །
8 B चित्त

श्रुत्वाथ राजा तद पुत्रवाक्यं
भृत्यं भणी रोषितु वध्यघात[क]म्[1] ।
आनेथ शीघ्रं इमु भिक्षु घातयी
स्थितु यः पुरस्तापि[2] अन्तःपुरस्य ॥९१॥

अथागमी पश्चि स[3] वध्यघातको
स रौद्रचित्तो[4] वसुनन्दिनामा[5] ।
असिं गृहीत्वान सतैलपाटं[6]
येनो कृतो भिक्षुण अष्टखण्डः[7] ॥९२॥

[कृत्वा त्वकर्मेति सुघोररूपं
निर्यातु उद्यानु गता क्षणेन[8] ।]
न तस्य क्रीडा च रती च जायते[9]
स्मरित्व भिक्षुं तद पुष्पचन्द्रम् ॥९३॥

1 B वध्यघातकः
2 A पुस्तामि ; B पुरस्तामि ; Tib. 219b, l. 1 : མདུན་འདུག་པ་ཡི །
3 A & B यश्च स वध्य० 4 B घातकः रौद्र०
5 B कृपुनन्दिनामा ; C ०नाम्ना
6 A & B गृहीत्वाथ स तैलपायितं ; C तैलपातं
Tib. 219b, l. 2 : འབྲུ་མར་དར་བདགས ། 7 C खण्डशः
8 A & B add :—न तस्य च्छिन्नादपि अङ्गमङ्ग रक्तास्रवी रश्मिसहस्र निश्चरी ।
श्रीस्वस्तिकाश्चक्रतु खण्डच्छेदेष्वन्तर्गता लक्षणा तस्य काये ॥
Tib. 219b, ll. 3-4 : བཅད་པའི་འཕྲོ་ནི་དཔལ་བེའུ་འཁོར་ལོ་དག །
མཚན་རྣམས་དེ་ཡི་ལུས་ཀྱི་ནང་ན་ཡོད །
ཤིན་ཏུ་མ་རུངས་ལས་ནི་བྱས་ནས་སུ །
སྐྱིད་མོས་ཚལ་དུ་དེ་ཡི་མོད་ལ་བྱུང །
9 A क्रीड़ासु च जायते मनः ; C क्रीड़ा व रती व जायते

ज्ञानप्रदीपं[1] करि[2] सवलोके
कस्मा[3] स मे घा[ति]तु कामकारणात्[4] ॥९८॥
यो धर्म प्रव्याहरती[5] प्रजानां
गम्भीर शान्तं निपुणं सुदुर्दशम् ।
यो बोधिमण्डस्य[6] वरस्य देशकः
सोऽयं मया घातितु कामकारणात् ॥९९॥
यो धर्मकोशन्धुरु नायकाना-
मन्धस्य लोकस्य प्रदीपभूतः ।
यो धारणी धारयि सूत्रराजं
स किं मया घातितु कामकारणात् ॥१००॥
असंकिलिष्टः सुविशुद्धज्ञानी
शान्तः प्रशान्तः सततं समाहितः ।
कामान्धभूतेन मयाद्य घातितो
येनातिकष्टं निरयं गमिष्ये ॥१०१॥
येऽतीत बुद्धाप्यथ ये[7] अनागता
ये चापि तिष्ठन्ति नरोत्तमा जिनाः ।

1 Tib. 220a, l. 3: ཆོས་ཀྱི་སྒྲོན་མ །

2 A करु ; B ०प करुणात्म० 3 Mss. कष्टं

4 A & B & Tib. 220a, ll. 3-4: add
यो वैद्यराजो इह सर्वलोके चिकित्सको सत्त्व सदा गिलानकाः ।
विरेचनस्यो अमृतस्य दायको भिक्षुर्मया घातितु कामकारणात् ॥

5 A धर्मु प्रव्याहरति ; B प्रभ्याहरते

6 Tib. 220a, l. 5: बोधिगर्भ=བྱང་ཆུབ་སྙིང་པོ །

7 A ०बुद्धास्तथापि च ये ; B येऽतीतबुद्धास्तथ ये

अनन्तवर्णान् गुणसागरोपमान्
उपैमि सर्वाञ्छरणं[1] कृताञ्जलिः[2] ॥१०२॥

1 B सर्वासरणं ; In Tib. 220b, ll. 1-2 appear here the words:
འཕགས་པ་ཏིང་ངེ་འཛིན་གྱི་རྒྱལ་པོའི་མདོ། བམ་པོ་བཅུ་གསུམ་པ།

2 A & B & Tib. 220-1 add here अथ खलु राजा शूरदत्तः सुपुष्पचन्द्रं धर्मभाणकं हतं मृतमविवर्णशरीरं पृथिव्यां प्रपतितं दृष्ट्वा दुःखितो दुर्मना विप्रतिसारी विह्वलीभूतस्तस्यां वेलायां भूयस्या मात्रया महाक्रन्दमकार्षीत्। एवं च तं सुपुष्पचन्द्रं धर्मभाणकं सद्भूतगुणसंस्तवं करुणायुक्ताभिर्गाथाभिरध्यभाषत।

तुहु वुच्यमानोऽपि बहुप्रकारं आर्येण संघेन समन्तभद्रे।
मा गच्छ रत्नावति राजधानी मा अन्तरायो भव जीवितस्य ॥१॥

त्वं भिक्षुसंघस्य अगृह्य वाक्यं नगरीं प्रविष्टोऽसि किमर्थं मार्ष।
यस्यार्थि अर्थाय तुहु प्रविष्टः करोषि तं अर्थ प्रदीपभूतः ॥२॥

तं दिव्यनानाङ्कुरभूमिमण्डितं सुरूपरूपामलवृक्षसंकुलम्।
वरसिद्धविद्याधररक्षितं च खगाधिपैर्नादित देवजुष्टम् ॥३॥

उत्सृज्य यं वनवरु ह्लादनीयं समन्तभद्रं सद बुद्धवासितम्।
कार्येण येनेह त्वमागतोऽसि तं कार्यु आख्याहि ममाद्य सूरता ॥४॥

करोमि ते आज्ञ वचो श्रुणित्वा उत्तिष्ठ आज्ञापय बुद्धपुत्रा।
हा किं करोमी सांप्रत देवदेवा गच्छामि तुह्यं अहु शरणमनाथः ॥५॥

सिंहो यथा मृगपतिरद्वितीयो त्यक्त्वा स्वयूथं वरभिक्षुसंघम्।
स्वजीवितं चोज्झिय आगतोऽसि सत्त्वाननन्ताननुकम्पमानः ॥६॥

छिन्नासि धीरा मयि तुहु खण्डखण्डं रागाभिभूतेन सुमत्सरेण।
यावन्त आयान्ति हि भिक्षुसंघा द्रष्टुं समग्रास्तव राजधानीम् ॥७॥

विज्ञप्तिमेकामर्हसि ताव कर्तुं यं विज्ञपेमी अहु तव भीत भीतः।
अभयं ददित्वा तुहु पुष्पचन्द्र उत्थेहि पूर्णो शशिरिव पूर्णमास्याम् ॥८॥

प्रसादवान् भोहि ममात्मसत्त्वनिर्मुक्तदोषात्तुहु धर्मभाणका।
करोहि मे अद्य प्रसादमेकं उत्तिष्ठ सूर्योपम भासयन्तः ॥९॥

घोरान् गमिष्ये निरयांश्च्युतस्य[1]
त्राता न तत्र प्रतिविद्यते मम[2] ।
कर्म[3] ह्यनिष्टं हि कृतं मयाद्य
यद् घातितोऽयं मय[4] धर्मभाणकः ॥१०३॥
धिक् पापचित्तं व्यसनस्य कर्तृ
धिग् राजभावं[5] मदगर्वितानाम्[6] ।
एकः प्रयास्यामि विहाय सर्वं
सारं न मे[7] किञ्चिदितो गृहीतम् ॥१०४॥
विशुद्धधर्मो[8] गतदोषमोहः[9]
प्रियंवदः कारुणिको जितात्मा ।
अदूषकः सर्वजनैकबन्धुः
कस्माद्धतो[10] मे वर पुष्पचन्द्रः ॥१०५॥
हा सुव्रता क्षान्ति तपोधनाढ्या
हा रूपदाक्षिण्यगुणैरुपेता ।

1 C घोरं गमिष्ये नरकं त्वित च युत
2 A त्रातारु नान्यो नु मे भविष्यति ; B त्रातारु न मे भविष्यति
3 A, B & Tib. 221a, l. 7 : पापं
4 A घातितो मे वर ; B समुद्घातितो मे वर ; C मम
5 B & C राजभावो
6 B मददर्पितानाः
7 A हो रत्न मे ; Tib.221b, l.1 :
འདི་ནས་བདག་གིས་སྙིང་པོ་ཅི་མ་བླངས །
8 A & C ०धर्मा
9 A, B & Tib. 221b, l. 1 : हतरागदोषः
10 B कस्माद्धतौ ; C क्वासहतो

हा निष्कुहा[1] श्रीघन निष्प्रपञ्चा
कुह प्रयातोऽसि[2] विहाय [3]मा त्वम्[4] ॥१०६॥

1 B हा निष्ठहा
2 A कहिं प्रयातो हि ; B कहिं प्रसासोध
3 B विहास मातरः ; C मातनम्
4 A, B & Tib. 221b-224 add

छियन्ति आर्या तव अङ्गमङ्गं त्तीरं स्रवी रश्मिसहस्र निश्चरी ।
आश्चर्यभूतो अयु सर्वलोको उत्थेहि आचार्य ममा विनायका ॥१॥

हा पुष्पचन्द्र कारुणिका सुदान्ता हा एहि मैत्रीकृपपुञ्ज पर्वता ।
हा धर्मगम्भीर सुदेशका वरा उत्तिष्ठ देवा अनुकम्पयाहि मे ॥२॥

हा एहि संपूर्णशशांकवक्त्रा हा एही भूमीषु दशासु सुस्थिता ।
हा उदगता दश वशितेहि वीरा कहिं गता सा वशिता तवायुषि ॥३॥

हा एहि वीरा मम देहि वाचं क सा गता ते करुणातिवीर्या ।
त्तान्ती त्वया भावित दीर्घकालं उत्तिष्ठ मैत्र्याधिक मुंच वाचम् ॥४॥

हा देव देवाधिक पूजनीया किं तिष्ठसे तूष्णिकु धर्मभाणका ।
हे उत्थि गेहं मम गच्छ पण्डिता देशेहि धर्मं पुरिनारिसंघे ॥५॥

न शक्नुते वा तव काय खण्डितुं सुरासुरैः किन्नरयत्तराक्षसैः ।
अभेद्यु तुभ्यं अयु कायु दिव्ये कुरुष्व मा माय त्वमद्य पण्डिता ॥६॥

किं तिष्ठसे माय करित्व देवा न शोभते मायवि बोधिसत्त्वः ।
उत्थेहि त्वं वर्जिय सर्व माया देशेहि धर्मं तुहि पुरि रत्नवत्याम् ॥७॥

हा एहि आर्या मम पुष्पचन्द्रा हा एहि त्रैधातुकि वीतरागा ।
हा एहि मातापितृभूतनायका पिधेहि द्वारं नरकाण मह्यम् ॥८॥

अपयोपपन्नानगतीपरायणो महा अवीचौ पतितान प्राणिनाम् ।
हा त्रायका एहि सुपुष्पचन्द्रा विवरेहि द्वारं मम संगतीनाम् ॥९॥

सप्ताहऽभुक्तोऽसि त्वमद्य नाथा उत्तिष्ठ गेहे मम भुक्ति भक्तम् ।
भुक्त्वा च भक्तं मम सत्त्वनेकां स्थपेहि धर्मे इह रत्नवत्याम् ॥१०॥

हा मह्य ताता वरधर्मकोविदा हा एहि सत्त्वेषु अवैरचित्ता ।
हा एहि देशस्व ममात्र धर्मं हा एहि प्रणिधानु तवाशु सिध्यतु ॥११॥

अद्यावगच्छामि महर्षिवाक्यं

हा नाथऽनाथोऽत्र साम्प्रत भिक्षुसंघो हा अन्धभूतो विह्वलशोकप्राप्तः ।
हा उत्थि शीघ्रं तुहु मम सत्त्वसारा उत्थाय चाश्वासय भिक्षुसंघम् ॥१२॥

हा एहि त्रैलोक्यप्रदीपभूता हा एहि गच्छाम समन्तभद्रम् ।
गत्वा च वनखण्ड-समन्तभद्रे शुद्ध देहि दर्शन हिताय प्राणिनाम् ॥१३॥

भो भो धर्मधरा महाद्भुतगुणा अश्वत्थपुष्पोपमा
भो भो वीक्षहि भिक्षुसंघ विमला प्रज्ञा कृपालोचना ।
भो भो देशय वाक्पथातिविगतं ता धारणीं भिक्षुणां
भो भो उत्थिहि पुष्पचन्द्र उदया चन्द्रोपमर्या इह ॥१४॥

भो भो मय्यनुकम्पका जिनसुता आश्वासकानुत्तरा
भो भो दण्डकशस्त्रताडन-महाक्षान्तीबला सूरता ।
भो भो कारुणिका सुपुष्पचन्द्र वरदा उत्थेहि त्वं नायका
भो भो उत्थिय देशया तुहु ममा या धारणी दुर्दृशा ॥१५॥

भो भो सर्वजगेव भासजनका प्रज्ञाप्रदीपोत्तमा
भो भो सत्त्वहितार्थ उद्यतरता करुणावरा नायका ।
भो भो उत्थिहि पुष्पचन्द्र विरजा सत्त्वान अर्थंकरा
भो भो उत्थिहि सत्त्वकोटिनियुतान् स्थापेहि शान्ते पुरे ॥१६॥

भो भो शीलधनेनुपेत मतिमान् शिक्षाधनाढ्या विदू
भो भो शीलव्रते स्थिता अभिरता धर्मद्रुमस्याङ्कुरा ।
भो भो रक्तकषायचीवरधरा नैष्कम्यतुष्टा सदा
भो भो सुप्रभ पुष्पचन्द्र वरदा उत्थेहि त्वं सुव्रता ॥१७॥

भो भो दान्त अदान्तसत्त्वदमका दमथेनुपेताः सदा
भो भो दान्त सुदान्तनामनुगताः शान्त-प्रशान्तेन्द्रियाः ।
भो भो सुप्त-प्रसुप्त-सत्त्व सततं बोधेहि धर्मस्वनैः
भो भो बोधयि सत्त्वकोटिनियुतां स्थापेहि यानोत्तमे ॥१८॥

भो भो नाव करित्व दानफलकैर्वीर्यैर्गुणैरन्विताम्
भो भो सत्त्व महार्णवे प्रपतितान् तृष्णाय उद्यातकान् ।
भो भो दशबला सुपुष्प कुशला उत्थेहि नावारुहा
भो भो आरुहियान नाव सुदृढामुत्तारयेही तु माम् ॥१९॥

भो भो वैद्यवरा व्रतेषु चरिता वैद्योत्तमा वेदका
भो भो ज्ञानविमुक्ति-पारमिगता सद्धर्मभैषज्यदा ।
भो भो सत्त्व-गिलान दृष्ट्व विविधरोगैः समभ्याहता
भो भो ज्ञानसुवैद्यराज अतुला ज्ञानोद्गता पारगाः ॥२०॥

कामा ह्यनित्या वधकाः प्रजानाम् ।

भो भो व्याधिचिकित्सका करुणया सत्त्वान अर्थंकरा
भो भो आतुरसत्त्व[लोक]निखिलं रागामयेनाहतम् ।
भो भो तेष प्रयच्छ उत्थिहि लघुं धर्मामयं भैषजं
येनो स[र्वे] विहरन्ति सत्त्व सुखिता निर्व्याधयो निर्वृताः ॥२१॥

भो भो आहनि धर्मभेरि विपुलां ज्ञाने[सदा] शिक्षिता
भो भो छिन्दहि सर्वसंशयलतां लोकस्य ज्ञानोदधेः ।
भो भो शुश्रुत धर्मधारि विरजा सूत्रान्तकोटीशतां
पर्षाया स्थितु आसने नरवरी प्रव्याहरी पण्डिता ॥२२॥

हे पुष्पचन्द्र वरलक्षणभूषिताङ्ग हे पूर्णशीति-अनुव्यञ्जन-चित्रगात्र
हे एहि तीर्णभवसागर निष्प्रपंच हे उत्थि मुंच भवचारकातः ।
हे भूत ब्रह्म वरज्ञानविदा हे पुष्पचन्द्र महाकारुणिका
हे उत्थि मैत्रकृप संजनिया सत्त्वान नाथ तुम अप्रतिमा ॥२३॥

हे पुष्पचन्द्र तव विज्ञपतीमा भिक्षुसंघ तुम मा उत्सृजाही
हे एहि संघ निकर्षयही हे उत्थि गच्छ वनखण्ड तहिम् ।
हे पुष्पचन्द्र चतुर्ध्यानरता हे मित्र[ामित्र]सम मैत्रस्थिता
हे उत्थि धारणिस्थिता असमा हे एहि उत्थि शुद्धज्ञानद्रुमा ॥२४॥

हे निष्प्रकम्प्या दृढमेरुसमा हे बुद्धपुत्र सत्त्व-सम-मना
हे पुष्पचन्द्र परिपूर्णव्रता हे उत्थि बोधिद्रुममूलि उत्तमा ।
हे दिव्यश्रोत्र वरधर्मधरा हे दिव्यचक्षु विदु ज्ञानविदा
हे उत्थि वीक्षि मम कारुणिका हे मह्य वाचे श्रृणु नन्तयशाः ॥२५॥

हे सर्वलोकहित अर्थंकरा हे पुष्पचन्द्र अतिदानरता
हे उत्थि आशु पुरि ममा खण्डखण्ड इह तिष्ठतु मा ।
नरनारिगणा इह ये नगरे त्वां दृष्ट्व सर्वि पतितं मृत्तिकं
कुर्वन्ति शोक हृदिशोषणकं वीक्षस्व तां सुकृपलोचनया ॥२६॥

यस्य कृतेन च विभावित मैत्री-प्रज्ञा-उपाय-बलं च निदानम्
करुणा-उपेक्ष-मुदितं च उदारं तं परिपूरय उत्थि सुपुष्पा ।
देवनाग असुरा महर्द्धिका यक्षराक्षसनराः सकिन्नराः
पुष्पधूपभरितांजलिपुटाः सर्वे एति स्थित दर्शनोत्सुकाः ॥२७॥

Six of the above-mentioned stanzas, viz., nos. 17-22 reappear in the text with a little variation, see infra, stanzas 51-52, 58-59. The reading of second line of stanza 18 which is supported by Tib. differs from that of stanza 52 of the text.

मनोज्वरा[1] दुर्गति-हेतवश्च
तस्मात् प्रहास्ये[2] एत कामचर्याम्[3] ॥१०७॥

यास्ये घोरमहं ह्यवीचिनिरयं त्राणं न मे विद्यते
पापं कर्म कृतं ह्यनिष्टमसुखं भिक्षुर्मया घातितः ।
मुक्त्वा राज्य हु ब्रह्मचर्यपरमः पूजां करिष्ये वरां
पुष्पैर्गन्धविलेपनैः सुरुचिरैः स्तूपं करिष्याम्यहम् ॥१०८॥

पुत्राश्चो दुहितृः स्त्रियो गृहपती ये चा अमात्या[4] मम
श्रेष्ठी नैगम[5] क्षत्रिया बहुविधाः सर्वेष भाषाम्यहम् ।
अगरु पद्मकु चन्दनं सुरुचिरं[6] गन्धाश्च ये शोभनाः
शीघ्रं [7]कुर्वथ मञ्जुगर्भशिविकां यद्भिक्षु ध्मायीय तु ॥१०९॥

श्रुत्वा पार्थिववाक्य सर्वनगरं गन्धां हरित्वा वरां
चितिकां[8] कृत्व मनोज्ञगन्धरुचिरामारोप्य भिक्षुं तहिम् ।

1 A & B मनोजला; Tib. 224b, ll. 4-5: ཡིད་ཀྱི་ནད་དུ ।

2 B प्रभोस्ये ; C प्रभाष्ये

3 B ०चर्याः

4 B & C दुहिती स्त्रियो गृहपतीन्ये ता ह्यमात्या मम

5 A निगाम

6 A सुमधुर ; B सुमधुरां

7 A ०गर्व० ; Tib. 225a, l. 1-2 :

ཀུར་དུ་སྦྲོམ་གྱི་སྙིང་པོའི་ཁྱོགས་ཆོས་ལ ।
དགེ་སློང་འདི་ནི་བསྲེག་པའི་ཚོགས་གྱིས ।

8 A & B शिविकां ; Tib. ཁྱོགས ।

अगरुं पद्मकु[1] चन्दनं सतगरं स्पृक्कां[2] तथा पाटलां[3]
पुष्पैर्माल्यविलेपनेन रुचिरैस्तैलेन प्रज्वालयी[4] ॥११०॥
द्रोण्यां तस्य कृतं शरीरमभवद् या मापिता[5] भिक्षुभि-
स्तेषां स्तूपु करित्व राज अवची पूजास्य कामाम्यहम्[6] ।
पुष्पं माल्य विलेपनं च ग्रहिय[7] च्छत्रान् पताकां ध्वजां-
स्तस्मिंस्तूर्यसहस्रकोटिनयुतां वादापयी पार्थिवः ॥१११॥
त्रैकाल्यं दिवसे व्रजी महिपति[8] भिक्षुस्य स्तूपं तदा
त्रिष्वप्यध्वसु[9] देशयी पुरिमकं यत्किंचि पापं कृतम् ।
वर्षा[10] कोटिसहस्रपञ्चनवतिं तं क्षेपयी[11] दुष्कृतं
शीलं [पश्चि] अखण्ड रक्षितु वरं शुद्धं शुची निर्मलम् ॥११२॥
वर्षा कोटिसहस्रपञ्चनवतिं पोषी तदा पोषधं
भिन्ने चो तद आत्मभावि पतितो घोरामवीचिं[12] पुनः ।
कृत्वा निर्घृणकर्म वेदयि दुखं कामं निदानं बहु
बुद्धा कोटिसहस्रपञ्चनवतिं[13] वीरागिता[14] ये मया ॥११३॥

1 A, B & Tib. अगरु चम्पक
2 A & C स्मृकां ; B स्पृच्यां ; Tib. 225a, l. 3: ཀྲུ་སྤྲོས་སྤྲི་ཀ །
3 A पातलां ; B पाटलाः ; Tib. प-त-ल
4 A रुचिरं तैलेन प्रज्वालमी
5 A व्या मापिता ; B या मापिभि०
6 B पूजा करिष्याम्य०
7 B गृह्णय
8 B व्रजी महीपति ; C प्रजा महिपति
9 A तिष्वप्यस ; B & C तृष्व
10 B वर्षकोटि'
11 B प्रक्षेपयी
12 B घोरमवीचि'
13 A drops पञ्चनवती
14 A वीरागता

वर्षा कोटिसहस्रपञ्चनवती अन्धोऽहमासं तदा[1]

द्वाषष्टीपि च कल्पकोटिनयुता नेत्रा मि भिन्ना[2] पुरा ।

नैका[3] कल्पसहस्रकोटिनयुतामुत्पाट्य चक्षुर्हृतं

हस्ता च्छिन्न अनन्तकल्पनयुतान् पादाश्च कर्णाः शिराः ॥११४

[मानुष्ये सति कल्पकोटिनयुतानन्यासु वा जातिषु]

दुःखा वेदन[4] वेदयामि च चिरं संसार-दुःखार्दितः ।

कृत्वा [पाप]कु कर्म दुःखनुभवी संसारमाणश्चिरं[5]

तस्मात् पापु न कुर्यु अध्वि त्रिभवे यो बोधिमिच्छेच्छिवाम्[6] ॥११५

देशेत्र कर्मं पुरिमकु राजश्रेष्ठो

नासौ विमुच्यी[7] पुरिमकु दुष्कृतातः[8] ।

कृत्वा च कर्मं पुरिमकु घोररूपं

स च च्यवित्व [9]गच्छेन्निरयमवीचि घोरम् ॥११६॥

हस्ता विच्छिन्नास्तथपि च [पाद]कर्णं[10]

नासा विच्छिन्ना बहुविध नन्तकल्पान्[11] ।

1 A ०संस्तदा ; B अन्धोमासं तदा०

2 Tib. 225b, l. 3: མིག་ཀྱང་བཅར་བར་གྱུར །

3 B नैकां कल्पकोटिनियुताद्युत्पाद्य चक्षुहृतः ; C नैका कल्पकोटि०

4 A दुःखं वेदने ; B दुःखां वेदन

5 B कृत्वा पापकुर्म दुःखमनुभवी सत्त्वाधर्मानश्चिरं ; C कृत्वा कुकर्म दुःखिनुभवी सत्त्वावमानश्चिरम्

6 B तस्मात् पाप कुर्यु अथि त्रिभवे सो इच्छि बोधिन् सिवाम्

7 A विमुच्यां 8 C संस्कृतातः ; B नासो विमुची परिमुक्त दुष्कृतातः

9 A गच्छ निरय ; B पुरिमुक्तघोररूपं स च्यवित्व गच्छौ निरये ; C चरित्व ;

10 A, B & Tib. 225b, l. 7: पि च पादकर्ण नास

11 C ०कल्पः

नेत्रा च मह्यं बलशो हृता क्षिपित्वा[1]
उ[त्]क्षिप्त[2]दण्डैर्विचरतु चारिकायाम्[3] ॥११७॥
त्यक्त्वा स्वकाये[4] शिर-कर बोधिहेतोः
पुत्राश्च दारान्नयन तथात्ममांसम्[5] ।
हस्तांश्च पादान् परित्यजि[6] हृष्टचित्तो
नो च क्षपेमी पुरिमकु पापकर्म[7] ॥११८॥
राजा अभूवं तद अहु[8] शूरदत्तो
ते पुत्र मह्यं चरिमक धर्मपालाः ।
पद्मोत्तरोऽयं[9] आसि सुपुष्पचन्द्रो
वसुनन्दि आसीद्दशबलु[10] शान्तिराजः[11] ॥११९॥

1 A नेत्राश्च मह्यं बलशा हृता त्तपित्वा ; B बलस हृदा त्तपित्वां ; C बलसह्यता
2 A drops प्त
3 A & B विचारिकायां ; C चाथ काप ; Tib. 226a, l. 1:
སྤྱོད་པ་སྤྱོད་ཚེ་མཚོན་ཆ་དབྱུག་ཐོགས་ནས། །
འདེབས་བྱེད་ནན་གྱིས་ང་ཡི་མིག་ཀྱང་ཕྱུང་། །
4 A स्वकाये ; B सकाये		5 B दारा नयन तथात्ममांसः
6 A हस्ताश्च पादा परित्यजि
7 A, B & Tib. insert here the last three stanzas, 121-3. See infra.
8 A अभूवन्नहुतस्तद ; B ०वन्नहु तद ; Tib. 226a, l. 6:
རྒྱལ་པོ་དཔལ་བྱིན་ཡིན=श्रीदत्त
9 C ०रोय
10 A, B & Tib. 226a, l. 6: यो नन्दको आसि स ; Tib. omits दशबलु
11 A, B & Tib. add
तथागतोऽभूद्द्विपदान[मु]त्तमो त्रिलोकशूरो जगदेकबान्धवः ।
कृत्वा च अर्थं विपुलं प्रजानां परिनिर्वृतो दीपु यथैव नायकः ॥

सो[1]नारिसङ्घो सुविपुल क्षत्रियाश्चो[2]
गृहपती ये बलपति ये[3] च मात्याः ।
श्रेष्ठी तथैव नैगम कोट्टराजा
सर्वेऽप्यभूषी दशबल निष्किलेशाः ॥१२०॥

कुमार एवाचरितमनन्तकल्पं
दृष्ट्वान बुद्धान् धुतगुण निष्किलेशाः ।
ते तेऽमि दुःखा तद अनुभूतपूर्वा
चरन्तु श्रेष्ठां इम वरबोधिचर्याम्[4] ॥१२१॥

यो बोधिसत्त्वः प्रतिष्ठित धारणीये
मैत्राविहारी अचलितु अप्रकम्पी ।
नासौ कदाचिद् व्रजति अपायभूमिं
पूजेत्व बुद्धान् धुत[गुण] निष्किलेशान्[5] ॥१२२॥

1 A नारिसंङ्घस्सुवि० ; B स नारिसङ्घो सुविपुलु 2 C चत्रियास्यो
3 A गृहपतो जनपति ये ; B गृहापती बलपति ते ; C गृहापती ये बलपति ते
4 A, B & Tib. आनन्द एवं चरत अनन्तकल्पान्
दृष्ट्वानु बुद्धां शिरिघन-अप्रमेयान् ।
ते ते मि दुःखा तद अनुभूत पूर्वां-
श्चरमाणु श्रेष्ठामिय वर बोधिचर्याम् ॥
5 A, B & Tib. ये बोधिसत्त्वा प्रतिष्ठितु धारणीये
मैत्रीविहारी अचलु [सदा]प्रकम्पी ।
नासौ कदाची व्रजति अपायभूमिं
पूजेत बुद्धां धूतरज देवदेवान् ॥

योे इच्छि बुद्धो कथमिह धर्मस्वामी
द्वात्रिंशतीभिः कवचितु लक्षणेभिः ।
सो शील रक्षी अशबल अप्रवेधा
देशेति धर्मं प्रतिष्ठितु धारणीये[1] ॥१२३॥

इति श्रीसमाधिराजे[2] सुपुष्पचन्द्रपरिवर्तः
पञ्चविंशतितमः[3] ॥२५॥]

1 A, B & Tib. यो इच्छि बुद्धा भविष्ये धर्मस्वामी
द्वात्रिंशताभि सज्जिता लक्षणेभिः ।
सो शीलु रक्षी अशबलु अप्रमादिं
देशेतु धर्मं प्रतिष्ठितु धारणीये ॥

2 B drops श्रीसमाधिराजे 3 B परिवर्तो नाम पञ्चविंशतितमः अध्याय

षट्त्रिंशपरिवर्तः

[1]तस्मात्तर्हि कुमार य आकांक्षेद्बोधिसत्त्वो [महासत्त्वः] किमित्यहं सुखमनुत्तरां सम्यक् संबोधिमभिसंबुध्येयमिति। तेन कुमार बोधिसत्त्वेन महासत्त्वेन[2] शीलस्कन्धे सुप्रतिष्ठितेन भवितव्यं सर्वबोधिसत्त्वेषु च शास्तृ-प्रेमसंज्ञा उपस्थापयितव्या। अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत।

यः शीलस्कन्धे प्रतिष्ठितु बोधिसत्त्वो
हितैषिचित्तो विचरति चारिकायाम्।
क्षिप्रं स गत्वा अभिरति[3]-बुद्धक्षेत्रं
क्षान्तिं लभित्वा भविष्यति धर्मराजः[4] ॥१॥

1 A, B & Tib. add : तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म।

2 B & Tib. insert here:—अयं सर्वधर्मस्वभावसमताविपञ्चितः रश्मिजालसमाधिः श्रोतव्यः उद्ग्रहीतव्यः धारयितव्यो वाचयितव्यो पर्यवाप्तव्यः प्रवर्तयितव्यः उद्देष्टव्यः स्वाध्यातव्यः अरणाभावनया भावयितव्यो बहुलीकर्तव्यः परेभ्यश्च विस्तरेण संप्रकाशयितव्यः शीलस्कन्धेन सुप्रतिष्ठितेन भवितव्यम्।

In A the above passage is inserted after उपस्थापयितव्यः।

3 B क्षिप्र स सत्वा अभिरति ; C अतिरति ; Tib. 226b, l. 7:

མངོན་དགའི་སངས་རྒྱས་ཞིང །

4 A भविष्य धर्मराजा ; B ०राजा

तस्मात् समग्रा भवथ अदुष्टचित्ताः[1]
सर्वे च भोग[2] सतत मनापकारी[3] ।
दृष्ट्वा च बुद्धाञ्छिरिघन अप्रमेयान्[4]
बोधिं स्पृशित्वा भविष्यथ धर्मस्वामी ॥२॥
तस्माच्छ्रुणित्वा इम वर आनुशंसान्[5]
दृष्ट्वा च भिक्षून्[6] परम सुशीलवन्ता[7] ।
निःशाठियेनो विदु सद सेवितव्याः
समाधिप्राप्ता भविष्यथ नो चिरेण ॥३॥
सचे[8]न्निधानापरिमिताप्रमाण
पूर्णा भवेयु मणिरतनेभि सप्तैः[9] ।
तथैव[10] भूयो रतनवराण पूर्णाः[11]
क्षेत्रा भवेयुर्वालिकगङ्गतुल्याः ॥४॥
दानाधिमुक्तो[12] भविय स[13] बोधिसत्त्व
एकैक रात्रिन्दिवमिह[14] दानु दद्यात् ।

1 A भवथ दुष्टचित्ताः
2 A भोगा
3 Tib. 227a, l. 1: ཐམས་ཅད་རྟག་ཏུ་ཡིད་དུ་འོང་བར་གྱིས །
4 A ॰मेयां ; B अप्रमेया
5 B इह वर आनुशंसा
6 A & B भिक्षु
7 A ॰वन्तं ; B वन्तां
8 C सचेनिधाना
9 A ॰रतनेहि सप्तभिः ; B सप्तभिः
10 B यथैव
11 A ॰यो मणिरतनान पूर्णाः
12 C दानादिभुक्ता
13 B भवेयं स ; C य
14 A ॰त्रिदिन॰

एवं ददन् सो बहुविध कल्पकोटीः
नो विष्ठित[1] स्याद् वालिकगङ्गतुल्याः ॥५॥
यश्चो समाधिं इमुमिह[2] बोधिसत्त्वो
श्रुत्वान धारेत सुगतवराण[3] गंजम्[4] ।
यः पुण्यस्कन्धो भवति गृहीतु तेनो
तत् सर्व दानं कलमपि नानुभोन्ति[5] ॥६॥
एषो वरो अनुपम पुण्यस्कन्धो
ज्ञानस्य कोश[6] अपरिमिताकरोपम ।
श्राद्धो[7] नरो यो इमु आनुलोमिकं
धारेय्य अग्रं इमु विरजं समाधिम् ॥७॥
धारेय्य एत विरज समाधि शान्तं
महाधनो भवति स बोधिसत्त्वः ।
महासमुद्रो बहुविधरतनस्य आकरो[8]
न तस्य पुण्यस्य प्रमाणमस्ति[9] ॥८॥

1 A अधिष्ठित ; B नाधिष्ठितः; C नो विस्थित ; Tib. 227a, l. 4:
དེ་བཞིན་བསྐལ་པ་གངྒཱའི་བྱེ་མ་སྙེད །
གྲུབ་མི་ཆད་པར་སྦྱིན་པ་བྱིན་པ་བས །

2 A समाधिमिदमिह ; B ०धिमिमं मिह 3 A धारे सुगतवराणं

4 B धर्मम् 5 A ०भोति ; B नावभोति

6 B ज्ञानकोसो ; C शुद्धो ; Tib. 227a, l. 6: ཡེ་ཤེས་མཛོད །

7 A & B श्राद्धा ; C श्रेष्ठा वरोयं चरु आनुलोमिकं यो

8 C ०समुद्रो च श्रुतस्य आगमो ; B ०समुद्रो व श्रुतस्य आकरो

9 B पुण्य प्रमाणु नास्ति

वरेहि धर्मेहि अचिन्तियेहि
संबृहितो[1] वुच्चति बोधिसत्त्वः ।
न तस्य बोधाय कदाचि संशयो
य उद्दिशेयाति[2] इमं समाधिम् ॥९॥

संस्थाप्य लोकाचरियं विनायकं[3]
[बुद्धं] महाकारुणिकं स्वयम्भुवम्[4] ।
यः पुण्यस्कन्धेन वरेणुपेतो[5]
अचिन्तियो यस्य प्रमाणु नास्ति ॥१०॥

न उत्तरो[6] तस्य च सत्त्व कश्चिद्
महासहस्राय कदाचि विद्यते ।
यः पुण्यस्कन्धेन समो भवेत
ज्ञानेन वासादृशाचिन्तियेन[7] ॥११॥

अन्यत्र यः श्रुत्व[8] समाधिमेतं
धारेय्य वाचेय्य पर्यापुणेय्या[9] ।

1 A सुसंवृतो ; C सुसंवृहितो   2 A उद्देशियाति ; B यद्दितससेयाति

3 B विनायकानां ; Tib. 227b. l. 2:
འཇིག་རྟེན་སྐྱོབ་དཔོན་སངས་རྒྱས་རྣམ་པར་འདྲེན། ।

4 B स्वयम्भुः

5 B स्कन्धनव रेणुपेतो ; C ०स्कन्धोन्धन वरेणय प्रेतो

6 C अनन्तर

7 A वा असदृश अचिन्तियेन ; B ज्ञानेन वा असदृश चिन्तियेन ; Tib. 227b, l. 3: མཚུངས་མེད་བསམ་གྱིས་མི་ཁྱབ་ཡེ་ཤེས་ཀྱིས། ।

8 B श्रुत्वा

9 A धारेय्य पर्यवापुणेय्या ; B ०मेतद्धारेय्य वाचय पर्यापुणार्या

पर्येषमाणोऽतुल[1] बुद्धबोधिं
न तस्य ज्ञानेन समो भवेत[2] ॥१२॥
स चेत् कुमारा सिय अयु धर्मरूप[3]
यः पुण्यस्कन्धो उपचितु तेन भोति[4] ।
धारेत्व वाचेत्व इमं समाधिं
न सो विचेय्या[5] इह पृथु लोकधातुषु[6] ॥१३॥
तस्मात् कुमारेह[7] य बोधिसत्त्वो
आकाङ्क्षते पूजितु सर्वबुद्धान् ।
अतीत उत्पन्न तथागतांश्च[8]
धारेतु वाचेतु[9] इमं समाधिम् ॥१४॥
एषा [हि][10] सा बोधि तथागतानां
श्रद्धेहि मह्य वचनं कुमाराः ।
न भाषते वाचमृषां तथागतो[11]
न हीदृशाः सत्त्व मृषां वदन्ति[12] ॥१५॥

1 A माणो अतुलीय बुद्ध ; B ०माणो अतुलिय बुद्ध०
2 A ०बोधि समसमो ; B भवेत्
3 B कुमाराः सिय धर्मरूप ; C सिय आयु धर्मरूपी ; Tib. 227b, l. 5:
གཞོན་ནུ་ཇི་སྙེ་ཆོས་དེ་གཟུགས་ཡོད་ན །
4 A ०चितु न भोति ; B उपरितु तेन भोति
5 A न सा समेय्या ; B न सो समेर्या ; C चो ; Tib. 227b, l. 5:
ཤོང་མི་འགྱུར །
6 B लोकधातु
7 A कुमारेणेह य ; B कुमारे य ; C कुमारेण
8 A तथागतानां ; B तथा अनागतान्
9 C धारेत्व वाचेत्व
10 B एषो हि समाधिः
11 B ०गतौ च
12 C मृषां त्व कोटीन

यस्मिन्[1] मया शोधितु आत्मग्राहो
इतः पुरे[2] कल्पशतानचिन्तियान् ।
श्रेष्ठां चरन्तेन पि[3] बोधिचारिकां
पर्येषमाणेन इमां समाधिम् ॥१६॥

तस्मादिमं श्रुत्व अथ[4] धर्मगंजं
यः सूत्रकोटीनयुतान आगमः ।
यः पुण्यस्कन्धो विपुलो अचिन्तियो
येनो लघुं बुध्यति[5] [बुद्ध]ज्ञानम् ॥१७॥

सर्वेष सूत्रादिणमग्रसूत्र-
मचिन्तियस्यो कुशलस्य आकरम् ।
पर्यन्तु धर्माण न तेष लभ्यते
यां सो सदा निर्दिशते[6] विशारदः[7] ॥१८॥

छिन्दित्व भिन्दित्व महासहस्रं[8]
शक्यं गणेतुं[9] परमाणु-संचयः ।
न त्वेव ते सूत्रशता अचिन्तियान्
[प्रमातु यं] भाषति सो अविष्ठितः[10] ॥१९॥

1 B अस्मिन्
2 C अतः परे ; B इतः परे
3 A & B चरन्तेन मि
4 A & B तस्मादिद' श्रुत्वथ
5 A B & Tib. लभ्यति
6 A & C निर्दिश्यते
7 A drops st. 18
8 A & C महासहस्रां
9 B गणयतु'
10 Tib. 228a, l. 4 5: རྒྱུན་མི་ཆད་པར་དེ་སྟོན་བགྲང་མི་ནུས།

आश्वास प्रश्वास गणेतु शक्यं
सर्वेष सत्त्वानिह बुद्धक्षेत्रे[1] ।
पर्यन्तु [2]सूत्राण न तेष शक्यं
यान् भाषते सोऽत्र समाधिये स्थितः[3] ॥२०॥
बुद्धान क्षेत्रा यथ गङ्गवालिका
ये तेष सत्त्वा गति तेषूपपन्नाः ।
गणेतु ते[4] शक्यमथापि चिन्तितु[5]
न तेष सूत्राण य नित्यु भाषते[6] ॥२१॥
गणेतु शक्यमित कल्पकोटिभिः
महासमुद्रेष्विह यान्ति[7] वालिकाः ।
नदीषु कुण्डेषु ह्रदेषु तद्वद्[8]
अनन्त सूत्रान्त स यत् प्रभाषते ॥२२॥
शक्यं गणेतु बहुकल्पकोटिषु
य आपस्कन्धः सद तत्र[9] तिष्ठति ।

1 A omits the first two lines of st. 20 ; B drops सर्वेष सत्त्वानिह बुद्धक्षेत्रे

2 A सर्वेसूत्राण 3 B & C समाधिस्थितः

4 A drops ते

5 A शक्य तथा विचिन्तितु ; B तथापि चिन्तितु

6 Tib. 228a, l. 6-7:

ཏིང་ངེ་འཛིན་མདོ་སྡེ་དེ་དག་བསྒྲང་མི་ནུས། །

7 A यातु ; B यान्त ; C यान्ति

8 A ह्रदेषु तद्वदनन्त सूत्रान्त समग्र ; C ह्रदेषु तद्वनं सूत्रान्त समनन्तप्रभा॰

9 B आपश्च स्कन्ध स तत्र

शताय भिन्नाय[1] वालाग्रकोटियो

स्वरांग तेषां न तु श[क्यु] सर्वशः[2] ॥२३॥

शक्यं गणेतु बहुकल्पकोटिभि-

र्ये सत्त्व आसन् पुरिमेण तत्र[3] ।

य आत्मभावे विनिबद्धसारा

न तेष सूत्रान्त-निर्हार[4] जानितुम् ॥२४॥

गणेतु[5] शक्यं रुत सर्वप्राणिनां

ये सन्ति सत्त्वा दशसु दिशासु ।

न शक्यु सूत्रान्त गणेतु तस्य

यद् भाषतेऽसौ सततमविष्ठितः ॥२५॥

सवष धर्माण निदेशु जानति[6]

निरुक्ति-निर्देश-पदार्थ-कोविदः ।

विनिश्चये[7] भूतनयेषु शिक्षितो

विशालबुद्धिः सद हर्षप्रज्ञः[8] ॥२६॥

अभिन्नबुद्धि[9] र्विपुलार्थचिन्ती

अचिन्त्य[10] चिन्तेति सदा प्रजानति ।

1 A & B शताव भिन्नाव

2 A स्वरांगु तेषां न श० ; Tib. 228b, l. 1

བརྒྱ་ཚལ་སྐྲ་ཡི་རྩེ་མོས་བགྲང་ནུས་ཀྱང་ །

དེ་ཡི་དབྱངས་ཀྱི་ཡན་ལག་ཀུན་མི་བགྲངས །

3 A & C तत्ना

4 B जानितुः ; C निहारु

5 B गणाय

6 A ०ण विनिदेशु जानतीः ; B जानती

7 A & B विनिश्चितो

8 C सद पार्ष०

9 A & B अभिन्न०

10 B अचिन्त

घोषस्वभावं पृथु सर्व जानती
शब्दांश्च तान् निर्दिशतो न सज्जति ॥२७॥
असक्त[1] सो वुच्चति धर्मभाणको
न सज्जते सर्वजगस्य भाषतः[2] ।
प्रश्नान निर्देशपदेहि[3] कोविदः
तथा हि तेनो परमार्थु ज्ञातः ॥२८॥
एकस्य सूत्रस्युपदेशकोटियो
अचिन्तियां निर्दिशतो न सज्जति[4] ।
असंग-निर्देश-पदार्थ-कोविदो
भाषन्तु सो पर्षगतो[5] न सज्जते ॥२९॥
यः सुस्थितो भोति इहो समाधिये
स[6] बोधिसत्त्वो भवती अकंपियः ।
धर्मे बलाधानविशेषप्राप्तः
करोति सोऽर्थं बहुप्राण[7]कोटिनाम् ॥३०॥
यथैव मेरुरचलो[8] अकंपियः
सर्वेहि वातेहि न शक्य कंपितुम् ।

1 A अशक्यु ; B असंकु
2 B & C भाषतो
3 A, B & Tib. 228b, l. 6: शतेहि
4 A ०शतो न सज्जते ; B & C निर्दशती न सज्जति
5 C परिष तो ; B भाषन्ति सो
6 C एष ; B drops स
7 B प्राणि०
8 B मेरू अचलो

तथैव भिक्षुर्विदु धर्मभाणकं[1]
कंपेतु शक्यं न परप्रवादिभिः ॥३१॥
महासहस्रेष्विह[2] लोकधातुषु
ये पर्वता उक्त अकम्पनीयाः[3] ।
ते शक्य वातेन प्रकंपनाय[4]
न त्वेव धर्मे स्थितु शून्यि भिक्षुः ॥३२॥
यः शून्यतायां सततं प्रयुक्तो
बुद्धान एषो[5] नियतं विहारः ।
प्रजानती निश्चितु[6] [धर्मशून्यां
स] सत्त्व वादीभि[7] न शक्यु क्षोभितुम् ॥३३॥
अकंपियो भोति परप्रवादिभिः
सर्वप्रवादेहि अनाभिभूतः[8] ।
अनाभिभूतश्च अनिन्दितश्च
इमुमुद्दिशित्वान समाधि शान्तम् ॥३४॥
गतिंगतो भोति स शून्यतायां
सर्वेषु धर्मेषु न कांक्षतेऽसौ ।
अनन्तज्ञाने सद सुप्रतिष्ठितो[9]
इमुमुद्दिशित्वान समाधि शान्तम् ॥३५॥

1 A & B धर्मभाणको
2 C महासाहस्रे स्विह
3 A अकम्पियाः
4 A & B वातेन प्रकम्पितुं तदा
5 B येषो
6 C ०नति पश्यतु ; B निश्चित
7 C सर्ववादी हि ; B सर्ववादीभि
8 A ०देहिरना० ; B सर्वप्रवादिभि अना०
9 A प्रतिस्थितो ; B ज्ञाने सश्रुप्र०

बलानि बोध्यङ्ग[1] न तस्य दुर्लभा
प्रतिसंविदो ऋद्धिविधी अचिन्तिया ।
अभिज्ञ नो तस्य भवन्ति दुर्लभा
धारेत्व वाचेत्व इमं समाधिम् ॥३६॥
भवाभिवृत्तस्य[2] न तस्य दुर्लभम्
अनन्त ज्ञानेन जिनानु[3] दर्शनम् ।
संबुद्धकोटीनयुतानचिन्तियान्
सो द्रक्ष्यते[4] एतु समाधि धारयन् ॥३७॥
सर्वेष चो तेष जिनान अन्तिके[5]
[स] श्रोष्यते एतु समाधि शान्तम् ।
वरेण ज्ञानेन उपेतु भेष्यती
प्रतिसंविदासु वश[6]पारमिं गतः[7] ॥३८॥
सचेद् भवेन्मणिरतनान पूर्णा[8]
महासहस्रा इय लोकधातुः ।
ये दिव्य श्रेष्ठा मणिरतनाः प्रधाना[9]
हेष्टं उपादाय भवाग्रु यावत् ॥३९॥
यावन्त[10] क्षेत्रा बहुविध ते अनन्ता
जाम्बूनदासंस्तृत[11] पूर्ण सर्वे ।

1 C बलान्यबोध्यङ्ग
2 A निर्वृत्तस्य ; B निवृतस्य ; Tib. 229a, l. 7 :
སྲིད་པར་གྲུབ་པ་དག་ནི་རྙེད་མི་དཀའ ।
3 A & B ज्ञानीन जिनान 4 B संद्रक्ष्यते 5 A सन्तिके
6 A वशि 7 B गताः 8 A & C add स
9 A प्रभूताः ; B मणिरत्ना प्रभूता 10 A & B यावन्ति 11 A संस्कृत

दानं ददे जिनवरेषु सर्वे[1]
भूमीत[लादु]परि भवाग्र यावत् ॥४०॥
याव[न्ति] सन्ति[2] बहु विविधा हि सत्त्वा
दानं ददेयुर्विविधमनन्तकल्पान् ।
बुद्धान दद्युः सततमविष्ठिहन्तो[3]
बोध्यर्थिको चो ददितु दानस्कन्धम्[4] ॥४१॥
यश्चैव भि[क्षुरभि]रतु शून्यतायां
बुद्धान्नमस्ये दशनख-प्राञ्जलीयो ।
न स दानस्कन्धः पुरिमकु याति संख्यां[5]
यः शून्यतायामभिरतु बोधिसत्त्वः ॥४२॥
तं चो लभित्वा स हि नरु पुण्यवन्तो
दानं ददेती विपुलु जनेत्व[6] श्रद्धाम् ।
पर्येषमाणो अतुलिय बुद्धबोधिम्
औपम्यमेतं कृतु पुरुषोत्तमेन ॥४३॥
यश्चो समाधिमिमु वरु[7] श्रेष्ठ गृह्णे[8]-
च्चतुष्पदां गाथ स तु[ष्ट]चित्तः ।

1 B निह प्रवरेषु सर्वे 2 B यावन्त सन्ती
3 A ०मधिष्ठिहन्तो ; B बुद्धान दद्यु शततनधिष्ठिह
4 B ०र्थिका चो दद्मिमु दानस्कन्धः ; Tib. 229b, l. 4-5:
བྱང་ཆུབ་འདོད་ཕྱིར་བྱིན་པའི་སྦྱིན་ཚོགས་ལ །
5 B पुरिमकुर्याति संख्या ; C पुरिमकु तस्य संख्यां
6 A ददेती विपुलु जनेत्व ; C दानं दे विपुलु ज०
7 A & B मिम वर 8 B गृहेन्ते

यः पुण्यस्कन्धो उपचितु तेन भोति[1]
तत् सर्वदानं शतिम कला नु भोति ॥४४॥
न ताव शीघ्रं प्रतिलभि बुद्धज्ञानं
दानं ददेत् [सो हित]करु बोधिसत्त्वः ।
अश्रुत्व एतं विरजु[2] समाधि शान्तं
यथ श्रुत्व शीघ्रं लभति स बुद्धज्ञानम् ॥४५॥
यश्चो लभित्वा इमु वर शान्तभूमिं
श्रुतस्य गोत्रं इमु विरजं समाधिम् ।
पर्यापुणेय्या प्रमुदितु बोधिसत्त्वः
स शीघ्रमेतं प्रतिलभि बुद्धज्ञानम् ॥४६॥
योऽपी निधानं प्रतिलभि एवरूपं
क्षे[त्राननन्तान्] यथरिव गङ्गबालिकाः ।
[ते चो भवेयुर्मणिरतनान पूर्णा]
दिव्यान चो तथपि च मानुषाणाम् ॥४७॥
दुर्द्धर्षु[3] सो[4] भोति प्रभूतकोशो
महाधनो धनरतनेनुपेतः ।
यो बोधिसत्त्वो लभति इमं समाधिं
पर्यापुणन्तः सततमतृप्तु भोति[3] ॥४८॥
राज्यं[5] लभित्वा परमसमृद्धस्फीतं
न तेन तुष्टो भवति कदाचि विज्ञः ।

1 A & B भोती
2 A & B विरज
3 B दुर्द्धषो
4 Mss. नो
5 B राज

यथा लभित्वा इमु विरजं समाधिं
तुष्टो उदग्रो भवति स बोधिसत्त्वः ॥४९॥

ते ते धर्मधरा भवन्ति सततं बुद्धान सर्वज्ञिनां
धारेन्ती वरधर्मनेत्री[1] विपुलां क्षीणान्तकाले तथा[2] ।
धर्मकोशधरा [महा]मतिधराः सर्वज्ञ-गंजंधराः[3]
ते ते सत्त्वसहस्रकोटिनियुतांस्तोषन्ति[4] धर्मस्वरैः ॥५०॥

ते ते शीलधनेनुपेत मतिमान् शिक्षाधनाढ्या[5] नराः
ते ते शीलव्रते स्थिता अभिरता धर्मद्रुमस्याङ्कुराः ।
ते ते रक्तकषायचीवरधरा नैष्क्रम्यतुष्टाः सदा
ते ते सत्त्वहिताय अप्रतिसमाः सर्वज्ञतां प्रस्थिताः ॥५१॥

ते ते दान्त सुदान्त सत्त्वदमका दमथेनुपेताः सदा
ते ते शान्त सुशान्ततामनुगताः[6] शान्तप्रशान्तेन्द्रियाः ।

1 A नेति
2 Tib. 230a, l. 7:
ཟད་པའི་མཐར་ཐུག་དུས་སུ་གྱུར་པའི་ཚེ། །
ཆོས་ཀྱི་ཚུལ་མཆོག་རྒྱ་ཆེར་འཛིན་པར་འགྱུར། །
3 B सर्वज्ञगणैधरा 4 B ०तां यो स्तोषेन्ति 5 B धर्मधनाढ्या
6 B ते ते दान्त सुदान्ततामनुगताः ; see supra, p. 535 ;
Tib. 230b, l. 3-4:
དེ་དག་དུལ་བ་སེམས་ཅན་མ་དུལ་འདུལ། །
རྟག་པར་དུལ་བའི་གནས་དང་རྗེས་སུ་ལྡན། །
དེ་དག་དུལ་ཞིང་རབ་དུལ་རྗེས་སུ་སོང་། །
ཞི་བའི་དབང་པོ་རབ་ཏུ་ཞི་བ་ཡིན། །

ते ते सुप्त प्रसुप्त सत्त्व[1] सततं धर्मस्वनैर्बोधयी
बोधित्वा[2] वरश्रेष्ठ धर्मरतनैः सत्त्वान् प्रतिष्ठापयी ॥५२॥
ते ते दानपती भवन्ति सततं सद मुक्तत्यागी विदु[3]
ते ते मत्सरियैर्न संवसि महात्यागे रमन्ते सदा ।
ते ते सत्त्व दरिद्र दृष्ट्व दुखितान् भोगेहि सन्तर्पयी
ते ते सत्त्वहिते सुखाय सततं सर्वज्ञतां प्रस्थिताः ॥५३॥
ते ते आहनि धर्मभेरि विपुलां ज्ञाने सदा शिक्षिताः
छिन्दन्ती जन सर्वसंशयलतां ज्ञाने सदा प्रस्थिताः ।
ते ते सुश्रुत धर्मधारि विरजा सूत्रान्तकोटीशतान्[4]
पर्षायां स्थित आसने मति[धराः] प्रव्याहरी पण्डिताः ॥५४॥
ते ते भोन्ति बहुश्रुताः श्रुतिधराः सम्बुद्धधर्मन्धराः
कोशान् धर्म[मयान्] धरन्ति मुनिनां धर्मन्निधाने रताः[5] ।
ते ते भोन्ति विशालप्रज्ञ विपुलां प्रीतिं जनेन्ति सदा
देशेन्ता वरधर्म शान्त निपुणं नैर्याणिकं दुर्दृशम्[6] ॥५५॥

1 A & C drop सत्त्व   2 B बोधिसत्त्वा वर०

3 Tib. 230b, l. 5:

ཁོར་མོར་རྟག་ཏུ་གཏོང་ལ་བརྒྱང་བ་སྟེ །

4 A & C शतां ; see supra p. 536.

5 B कोसत्त्व धर्ममयश्चरन्ति मुनिनां धर्मन्निधाने रताः ; C धर्मं ;

Tib. 231a, l. 2-3:

ཆོས་ཀྱི་མཛོད་རྣམས་ཤིན་ཏུ་འཛིན་བྱེད་དེ །
ཐུབ་པའི་ཆོས་ཀྱི་གཏེར་ལ་དགའ་བ་ཡིན །

6 B निपुणान्नैर्याणिदृशः ; Tib. 231a, l. 3:

ཞིབ་ཅིང་འབྱུང་བར་འགྱུར་བ་བལྟ་དཀའ་བ །

ते ते धर्म[म]धर्म-ज्ञेय मतिमान् धर्मे स्थिताः सूरताः
धर्मराज्यि[1] प्रशासि अप्रतिसमा वरधर्मचारी सदा ।
ते ते भोन्ति विशिष्टधर्म[2]गुरुका गुरुगौरवे च स्थिताः
धर्मे नगवरे स्थिता मतिधरा धर्मध्वजोच्छ्रायिकाः[3] ॥५६॥
ते ते मत्त प्रमत्त सत्त्व सततं दृष्ट्वा प्रमादे स्थितान्
दृष्ट्वा चैव प्रनष्ट-उत्पथगतान् संसारमार्गे स्थितान् ।
तेषू मैत्र जनित्वुदार करुणा मुदिताप्युपेक्षा स्थिता[4]
तेषां[5] मार्गवरं प्रदर्शयि[6] शिवमष्टाङ्गिकं दुर्दृशम् ॥५७॥
ते तु नाव करित्व धर्म सुदृढा धारेन्ति[7] सत्त्वान् बहून्
उह्यन्तान् महार्णवेषु[8] पतितान् संसारस्रोतो गतान् ।
बोध्यङ्गा-बल-इन्द्रियैः कवचिताः सद्धर्मनावारुहाः[9]
तीरे पारमि क्षेम[10] नित्यमभये स्थापेन्ति सत्त्वान् सदा ॥५८॥
ते ते वैद्यवरा व्रतेषु चरिता वैद्योत्तमा वेदका
विद्याज्ञानविमुक्तिपारगमिता[11] सद्धर्मभैषज्यदाः ।
दृष्ट्वा सत्त्व गिलाननेकविविधै रोगैः समभ्याहतान्
तेषां धर्मविरेचनं ददति तद्धर्मैश्चिकित्सन्ति तान्[12] ॥५९॥

1 B ०राजि
2 B drops धर्म
3 B & Tib. धर्मे नगरवरे स्थिमतिधरा धर्मध्वजोच्छ्रायकाः
4 B तैष् मैत्र जनित्व दारकरुणां मुदिह्रूपेत्ता स्थिताः
5 B ते
6 A & C ०यि गिरं ; B अष्टाङ्गिकदृशः
7 B धर्म सुकृतान्तारेन्ति
8 B उध्वत्ता महतावषु
9 B कवचितां सधर्मनावारुही
10 A & C ०मि त्तामि
11 B पारमिगता
12 B ददति ते धर्मैश्चिकित्सन्निभां ; see supra p. 535.

ते ते वादि-अपवादिमथना[1] लोकेन्द्र वागीश्वराः
सर्वज्ञेय प्रभंकरा[2] मतिधरा वरज्ञानभूमिस्थिताः ।
शूरज्ञानबला बलप्रमथनाः संवर्णिता ज्ञानिभिः
ज्ञानेनो बहु सत्त्वकोटिनियुतांस्तोष्यन्ति धर्मे स्थिताः ॥६०॥
ते तेऽधिपति सार्थवाह विपदः सत्त्वान त्राणार्थिकाः
दृष्ट्वा सत्त्व प्रमूढ़[3] मार्गरतने सद मारपाशे स्थिताः[4] ।
तेषां मार्गवरं प्रकाशयि शिवं क्षेमं सदा निर्वृती
येन ज्ञानपथेन नेन्ति कुशलान्[5] बहु सत्त्वकोटीशतान् ॥६१॥
ते ते लेनु भवन्ति त्राणु शरणं चक्षुः प्रदीपंकराः
भीतानामभयप्रदाश्च सततं त्रस्तान चाश्वासकाः ।
तेऽतिदुःखितसत्त्व[6] ज्ञात्व परमान्[7] जात्यन्धभूतानिमान्
धर्मालोकु करोन्ति धर्मरतने[8] भूतनये शिक्षिताः ॥६२॥

1 Tib. 231b, l. 5:
དེ་དག་སྨྲ་བ་ཕ་རོལ་རྒོལ་བ་འཇོམས །

2 B प्रभकरी

3 B विशुद्ध Tib. 231b, l. 7:
སེམས་ཅན་རིན་ཆེན་ལམ་ལ་རྨོངས་གྱུར་ཅིང །

4 A & C स्थितान्

5 B नुत्तिकुशला ; A & C नन्ति

6 Mss. ते तु ; Tib. 232a, l. 3:
དེ་དག་སེམས་ཅན་ཤིན་ཏུ་སྡུག་བསྔལ་དང །
དམུས་ལོང་གྱུར་པ་འདི་དག་རིག་ནས་ན །

7 B ०खिता सत्त्व ज्ञान परमं

8 B करोन्ति धर्मरत्नै भूतेन

ये ये शिल्पवरा जगे बहुकराः सत्त्वान अर्थावहा
येभिः सत्त्व सदा भवन्ति सुखिताः शिल्पेषु संशिक्षिताः ।
शिक्षापारमितां गताः सुकुशला आश्चर्यप्राप्ताद्भुता[1]
ये बोधीनभिप्रस्थिता मतिधरा लोकस्य चक्षुर्ददाः ॥६३॥

नो ते तृप्त कदाचिदप्रतिसमा वरबुद्धधर्मश्रुताः[2]
शील-क्षान्ति-समाधिपारगमिता[3] गम्भीरधर्मश्रुताः ।
नो तृप्ताश्च[4] परेषु धर्मरतनं ते देशयन्तः शिवं
मोक्षोपायु प्रवर्षमाण वर्षं धर्मैर्नरांस्तर्पयी ॥६४॥

यावन्ती बहु सत्त्व तेषुपगता[5] धर्मार्थिकाः पण्डिताः
श्रोष्यामो वरधर्म-श्रेष्ठ-रतनं मार्गम् ऋजुम् अञ्जसम् ।
तेषां छिन्दिषु संशयान् मतिधरा धर्मेण सन्तोषयी
शील-क्षान्ति-समाधि-पारमिगता जानन्त सत्त्वाशयान् ॥६५

ज्ञानी ज्ञानवराग्र पारमिगताः सत्त्वाशये कोविदाः
जानन्तः परसत्त्व-चित्तचरितं येषां कथा यादृशी ।
ये ये ज्ञानकथाय सत्त्व नयुता वरधर्मचक्षुर्लभाः[6]
ते ते ज्ञानविशेषपारमिगता मार्गोपदेशंकराः ॥६६॥

मारो कोटिसहस्र तेष विदुषां चित्तं पि नो जानिषु
आकाशे यथ पक्षिणां पदगतिं ज्ञातुं न शक्या क्वचित् ।

1 B गताः कुशला आश्चर्यप्राप्ता जगै   2 B ० श्रुतैः
3 B पारमिगताः
4 B नोत्तप्ता च परेषु धर्मरत्नं ते देशयन्तः शिवां ; A & C नोत्तप्ताश्च
5 B तेषु गताः   6 B ०र्लभी

शान्ता-दान्तप्रशान्तज्ञानवशिनो[1] आर्येस्मि ज्ञाने स्थिताः
सर्वान् मार निहत्य[2] शूर वृषभो बुध्यन्ति बोधिं शिवाम् ॥६७
ऋद्धि-पारमिप्राप्त[3] भोन्ति सततं गच्छन्ति क्षेत्रान् शतान्
पश्यन्ती[4] बहुबुद्धकोटिनियुतान् गंगा यथा वालिकाः ।
चक्षुस्तेष न सज्जते दशदिशे पश्यन्ति रूपान् बहु[5]
ये चो सत्त्व[6] दशद्दिशे भवस्थिताः सर्वेष ते नायकाः ॥६८॥
ते तस्यो भणि आनुशंस[7] सकलां कल्पान कोटीशतान्
नो चो पूर्वचरीय वर्ण क्षपये[8] प्रतिभानतो भाषतो ।
बुद्धानां धनमक्षयं सुविपुलं ज्ञानस्य चो सागरं[9]
यो एतं विरजं[10] समाधिमतुलं धारेय[11] कश्चिन्नरः ॥६९॥

इति श्रीसमाधिराजे शीलस्कन्धनिर्देशपरिवर्तः षट्-
त्रिंशतितमः ॥३६॥

1 B ज्ञानबलिनो आयस्मिं
2 B सर्वा मारान्निहत्य
3 B पारमिताप्राप्त
4 A & C ०न्ति
5 B पश्यन्त रूपां बहु
6 B & Tib. ये चो सत्त्व दशदिशे ; C ये बोधिसत्त्व दश०
7 B भणि आनुसंसा
8 B पूर्वचरी वर्णु क्षेपयेत्
9 B ०रां
10 B एता विरजी
11 B विपुलां पोरपर्या

सप्तत्रिंशपरिवर्तः

तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म। तस्मात्तर्हि कुमार बोधिसत्त्वेन महासत्त्वेनेमांश्चा[1]परिमाणानाश्चर्याद्भुतान् बोधिसत्त्वधर्मानाकांक्षता क्षिप्रं चानुत्तरां सम्यक् संबोधिमभिसंबोद्धुकामेनायं सर्वधर्मस्वभावसमताविपंचितः समाधिः श्रोतव्य उद्ग्रहीतव्यः पर्यवाप्तव्यो धारयितव्यो वाचयितव्यः प्रवर्तयितव्य उद्देष्टव्यः स्वाध्यातव्योऽरणाभावनया भावयितव्यो बहुलीकर्तव्यः परेभ्यश्च विस्तरेण[2] संप्रकाशयितव्यः क्षान्तिबलं चानेन भावयितव्यम्। क्षान्तिरासेवयितव्या[3] भावयितव्या बहुलीकर्तव्या। धर्मार्थिकेन च भवितव्यं धर्मकामेन[4] धर्मपरिग्राहकेण धर्मानुधर्मप्रतिपन्नेन बुद्धपूजाभियुक्तेन भवितव्यम्। तेन त्रिषु स्थानेष्वभियोगः[5] करणीयः। कतमेषु त्रिषु। यदुत क्लेशक्षयाय[6] पुण्यबलाधिपतये[7] बुद्धज्ञानमाकांक्षता कुशलमूलान्यवरोपयितव्यानि नो तु खलु लोकसुखस्पर्शाभिकांक्षिणा। एषु त्रिषु [8]स्थानेष्वभियोगः करणीयः।

1 B ०सत्त्वेन इमाश्चान्याश्चा
2 B drops विस्तरेण
3 B ०रासेवितव्या
4 B adds धर्मरतेन
5 B त्रिसाहस्रे षुष्टानेष्व०
6 B क्लेशयाय महापुण्य० ; Tib. 233b. l. 3: पुण्यच्चेत्त०
7 A, B & C add यत्तया
8 B drops स्थानेषु

अथ खलु भगवांस्तस्यां वेलायां चन्द्रप्रभस्य कुमारभूतस्य[1] तमेवार्थमुद्द्योतयमान इममेव पूर्वयोगकथानिर्देशं गाथाभिगीतेन[2] संप्रकाशयति स्म ।

हन्त शृणोथ[3] ममेतु कुमारा
कल्पसहस्र यथा चरिता मे[4] ।
पूजित बुद्धसहस्रशतानि[5]
एषतु एतु समाधि प्रणीतम् ॥१॥
कल्प अचिन्तिय [6]एवमतीताः
क्षेत्रशतेषु ये वालिक अस्ति ।
एष[7] निदर्शनु कीर्तितु भोती
यं जिनु आसि गणेश्वरनामा ॥२॥
षष्टिरनूनककोटिसहस्रा-
ण्यासि गणोत्तमु तस्य जिनस्य ।
सर्वि अनास्रवि क्षीण-किलेशा
अष्टविमोक्ष-प्रतिष्ठित ध्यायी ॥३॥
तत्र च कालि इयमपि सर्वा[8]
क्षेम सुभिक्ष अनाकुल आसीत् ।

1 B ०भूतस्यैतदमेवार्थं०
2 B पूर्वयोगकथानिर्देशं भूयस्या मात्रया गाथाभिगीतेन विस्तरेण
3 B शृणो
4 B चरता मे ; C चरिताम्
5 B ·तानी
6 C एषम०
7 B एतु
8 B इयं मभि सर्वो ; C इयमभि

सौख्य समर्पित सर्वमनुष्याः
प्रीणित मानुषकेभि[1] सुखेभिः ॥४॥
पुण्यबलेन च सर्व उपेता
[2]दर्शनियास्तथ प्रेमणियाश्च ।
आढ्य महाधन सर्व[3] समृद्धा
दिव्यसुखेन समर्पितगात्राः[4] ॥५॥
सूरतु सुव्रत मन्दकिलेशाः
क्षान्तिबलाभिरता अभिरूपाः ।
देवपुरेषु यथा मरुपुत्राः
शीलगुणोपगता मतिमन्तः ॥६॥
तत्र [च] कालि महीपतिरासीद्
राजसुतो वरपुष्पसुनामा ।
तस्य च पुत्र अनूनकमासन्[5]
पंचशता स्मृतिमन्मतिमन्तः[6] ॥७॥
तेन च राजसुतेन जिनस्यो
षष्टि उद्यान सहस्रशतानि ।

1 B प्रणितमानुषकेभि ; C मानसकेभि ; Tib. 234a, l. 2:
མི་ཡི་བདེ་བ་དག་གིས་ཀྲུས་པར་གྱུར །

2 B दर्शनीयास्तथ

3 B सर्वि

4 Tib. 234a, l. 3:
ལུས་ནི་ལྷ་ཡི་བདེ་དང་ལྡན་པར་གྱུར །

5 B ०क)आसन्

6 B ०शता स्मृतिमांश्च

पुष्पफलप्रतिमण्डित सर्वे
तस्य निर्यातित कारुणिकस्य ॥८॥
विचित्र उद्यान सहस्रशता[1]
[2]चंक्रम-शय्य-निषद्यसहस्रैः ।
चीवरकोटिसहस्रशतेभिः
संस्तृत चंक्रमणाश्च निषद्याः ॥९॥
एवमनेकप्रकारसहस्रा
यात्तक श्रामणकाः परिभोगाः ।
राजसुतेन प्रसन्नमनेना
तस्य उपस्थापिताः[3] सुगतस्य[4] ॥१०॥
सो दशसु शुभकर्मपथेषु
राज प्रतिष्ठित साधु[5]जनेना ।
प्राण[6]सहस्रशतानयुतेभि-
र्गच्छि पुरस्कृतु नायकु[7] [द्रष्टुम्] ॥११॥
पुष्प-विलेपन-धूप गृहीत्वा
च्छत्रपताकध्वजांस्तथ वाद्यान्[8] ।
पूज करित्व स तस्य जिनस्य
प्राञ्जलिकः पुरत स्थित आसीत्[9] ॥१२॥

1 B ०तानी
2 A & C नाना चंक्रमशय्यनिषद्यसहस्रैः
3 B ०स्थपिता
4 A सुगतस्या
5 B प्रतिष्ठितु साधु ; C प्रतिष्ठितु सार्द्ध
6 A प्राणि
7 B नायक ; C नयुत
8 A adds साधु किं वक्ष्यति धर्मु नरेन्द्रः ; see stanza 13.
9 A आसन् ; B स्थितु आसन्

तुष्ट अभूत्तद भिक्षुसहस्रा
देवमनुष्यथ[1] यक्ष सुराश्च ।
व्याकरि किन्नु जिनो इमु पूजां
साधु किं वक्ष्यति धर्मु नरेन्द्रः[2] ॥१३॥

तस्य च आशय ज्ञात्व स्वयंभू
राजसुतस्य निरुत्तरु चित्तम् ।
पारगतो अधिमुक्तिपदेषु
तस्यिम[3] देशयि शान्तसमाधिम् ॥१४॥

याव[4] प्रमुक्त गिरा सुगतेना[5]
कम्पित मेदिनि सवनषण्डा[6] ।
पुष्प प्रवर्षि तदा गगनातः
पद्मशतापि च उद्गत भूमौ ॥१५॥

व्याकरि नायकु आशयु ज्ञात्वा
[अ]र्थपदेषु सुशिक्षित शास्ता ।
देशयि शान्तसमाधि नरेन्द्र-
स्तत्विमि[7] अर्थपदानि शृणोथः ॥१६॥

सर्वि भवा[8] अभवाः परिकल्पा-
स्तुच्छ मरीचिसमा यथ मायाः ।

1 B मनुष्याथ
2 B धर्मं मुनिन्द्रः ; Tib. 234b, l. 4:
རྒྱལ་བ་མཆོད་པ་འདི་ནི་ཟུང་སྟོན་དམ །
3 A तस्यमि ; B तस्मिमु
4 A याच
5 A सुगतेन
6 B वन्वन पर्णा ; C सद्वन०
7 A & B स्तत्वमि
8 A सर्वे ; B सर्विं भवाथे

विद्युत-मेघसमाश्चल शून्याः
सर्वि निरात्म निसत्त्व निजीवाः[1] ॥१७॥
आदितु शून्य अनागतधर्मा
नागत अस्थित[2] स्थानविमुक्ताः[3] ।
नित्यमसारकमायस्वभावाः
शुद्धविशुद्ध नभोपम सर्वे ॥१८॥
नैव च नील न पीत न श्वेता
नाम तु रिक्तकु घोषस्वभावाः ।
चित्तविविक्त अचित्तस्वभावाः
सर्वरुतापगताः क्षणिकत्वात् ॥१९॥
भाषतु अक्षरु संक्रमु नास्ति
नोपि अभाषतु संकरु भोति[4] ।
नापि च अक्षर देश व्रजन्ती[5]
नो पुनरक्षरु क्रान्ति कुतश्चित् ॥२०॥

1 A निर्जीवाः ; B सर्वि नीरात्म निःसत्त्व निजीवाः
2 A नोगतु अस्थितु ; C नो गत प्रस्थित 3 C विविक्ति
4 B भोती ; Tib. 235a, l. 4:
བཤད་པ་ན་ཡང་ཡི་གེ་འཕོ་བ་མེད། ।
མ་བཤད་ན་ཡང་ཡི་གེ་འགྲིབ་མི་འགྱུར། ।
ཡི་གེ་དག་ནི་ཕྱོགས་སུ་འང་མི་འགྲོ་སྟེ། ।
ཡི་གེ་གང་ནས་ཀྱང་ནི་འོངས་མ་ཡིན། ।
5 B ०क्षरु देश व्रजन्ति

सर्वगिरः स[1] प्रभाषति विज्ञो
नो च गिराय हरीयति चित्तम् ।
सर्वगिरो [2]गिरिघोषनिकाशो
तेन न सज्जति जातु गिराये ॥२५॥
याय गिराय स की[र्ति]तु धर्मः
सा गिर तत्क्षणि[3] सर्व[4] निरुद्धा ।
यादृशु लक्षणु तस्य गिराये
सर्विमि धर्म तल्लक्षणप्राप्तः[5] ॥२६॥
सर्विमि धर्म अलक्ष विलक्षाः
सर्वि अलक्षण [लक्षण]शुद्धाः ।
नित्य विविक्त विशुद्ध नभो[6] वा
संख्य[7] समास तु ते न उपेन्ति[8] ॥२७॥
संस्कृतासंस्कृत सर्वि विविक्ता
नास्ति विकल्पन तेषमृषीणाम्[9] ।

1 A drops स ; B सर्वगिरां सं
2 i. e. echo from a rock. 3 C त॰ क्षण॰
4 B सर्वि 5 A सर्वि धर्म तल्लक्षप्राप्ताः ; C प्राप्तिः
6 A नभा 7 B संखे
8 A उपेन्ती ; Tib. 235b, l. 3-4:
ཆོས་ཀུན་མཚན་གཞི་མེད་ཅིང་མཚན་གཞི་བྲལ །
ཐམས་ཅད་མཚན་མེད་མཚན་ཉིད་རྣམ་པར་དག །
རྟག་ཏུ་དབེན་ཞིང་གཙང་བ་ནམ་མཁའ་བཞིན །
མདོར་ན་དེ་དག་བགྲང་བར་ཉེར་མི་འགྱུར །
9 C तेष ऋशीणां

सर्वगतीषु[1] असंस्कृतप्राप्ता

दृष्टिगतेहि सदैव विविक्ताः[2] ॥२८॥

नित्यमरक्त अदुष्ट अमूढा-

स्तस्य स्वभाव समाहितचित्ताः[3] ।

एष समाधिबली बलवन्तो

यो इमु जानति ईदृश धर्मान् ॥२९॥

शैल-गुहा-गिरि[4]-दुर्ग-नदीषु

यद्व प्रतिश्रुत्क जायि[5] प्रतीत्य ।

एविमु संस्कुतु सर्वि विजाने[6]

मायमरीचिसमं जगु सर्वम् ॥३०॥

प्रज्ञ[7][बलं] गुण धर्मगतानां

ज्ञानबलेन अभिज्ञ ऋषीणाम् ।

1 B सत्त्वग०

2 Tib. 235b, l. 5:

འགྲོ་བ་ཀུན་དུ་འདུས་མ་བྱ་ཐོབ་པས།

ལྟ་བ་དག་ལས་ཁོར་མོད་པར་དབེན།

3 A ०रक्तमदुष्टममूढाः तस्य ; B नित्यमलत्त…स्तस्य ; Tib. 235b, l. 6:
དེ་ཡི་སེམས་ནི་རང་བཞིན་མཉམ་པར་བཞག།

4 A drops गिरि

5 A यद्वत् प्रतिश्रुक जायि ; B यद्व प्रतिश्रुक जायि ; C प्रतिश्रुत जायति

6 B विजानी

7 B प्रज्ञा

[वाच]-उपायकुशल्य निरुक्ता[1]
  यत्र प्रकाशितु शान्त समाधिः ॥३१॥
कल्पितु वुच्चति [2]कल्पनमात्रं
  अन्तु न लभ्यति संसरमाणे ।
कोटि अलक्षण या पुरि आसी-
  दपि अनागति प्रत्ययतायै[3] ॥३२॥
कर्म क्रियाय च वर्तति[4] एवं
  हीन उत्कृष्टतया समुदेन्ति[5] ।
विविक्त धर्म[6] सदा प्रकृतीये
  शून्य नि[रा]त्म विजानथ सर्वान् ॥३३॥
संवृति भाषितु धर्मु जिनेना-
  संस्कृत[7] संस्कृत पश्यथ एवम् ।
नास्तिह[8] भूततु[9] आत्म नरो वा
  एतकु लक्षण[10] सर्व जगस्य ॥३४॥

1 A प्रज्ञ उपाय ; B वाच उपायकुशला निरुक्ताः
2 A कल्पितु ; B कल्पित ; C कल्पान
3 Tib. 236a, l. 2 :
མ་འོངས་དུས་ཀྱང་ཤེས་པར་བྱ་བའི་ཕྱིར། །
4 A वर्त्तित ; B कर्म क्रिया च प्रवर्त्तित ; C कल्प क्रियाय 5 A समुदेन्ती
6 A जातकु धर्मु ; B जद्दधर्म ; C जन्तुक ; Tib. 236a, l. 3 :
ཆོས་རྣམས་རྟག་ཏུ་དབེན་ཞིང་རང་བཞིན་སྟོང་། །
7 B drops संस्कृत
8 C नास्ति हि 9 B सूततु
10 A एतुकु लक्षणु ; B एत्ततु लक्षणु

कृष्णाशुभ च न नश्यति कर्म
[1]आत्मन कृत्व च वेदयितव्यम् ।
नो पुन संक्रम[2] कर्मफलस्य
नो च अहेतुक प्रत्यनुभोन्ति[3] ॥३५॥

सर्वि भवा अलिकावशिकाश्चो
रिक्तकु तुच्छ[4] फेनसमाश्च ।
माय[5]मरीचिसमाः सद शून्या
देशितु शब्दितु[6] ते च विविक्ताः ॥३६॥

एवं विजानतु मन्यन नास्ती
शीलवु भोति[7] अनिःश्रितचित्तः ।
क्षान्तिबलेन न कल्पयि किंचि
एवं चरन्तु समाहितु भोति ॥३७॥

यात्तक[8] धर्म विजानि स राजा
तात्तक[9] देशित तेन जिनेन ।
श्रुत्व नृपो इमु धर्म जि[न]स्यो
सपरिवारु समाददि शिक्षाम् ॥३८॥

राजसुतो इमु श्रुत्व समाधिं
आत्तमना मुदितो भणि वाचम् ।

1 B drops आत्म
2 A नो पुन संक्रमु ; B नो पुन संक्रम्य ; C नो चितु
3 A ०हेतु कर्म प्रत्यनुभोति
4 A रिक्तक तुच्छग फेन
5 B माया
6 A & C देशित शब्दतु
7 A शीलतु भोति ; B शीलव्रतो ति अनिश्रित० ; C अनिःसृत
8 A यत्तक ; C यातक
9 A तत्तक

सुष्ठु सुभाषितु एष समाधी
एष तवा चरणेषु पतामि[1] ॥३९॥
तत्र च [2]प्राणिसहस्र अशीतिः
श्रुत्विमु धर्मस्वभाव प्रणीतम् ।
भूतु अयं परमार्थ निर्देशो
ते अनुत्पत्तिकक्षान्ति लभिंसु[3] ॥४०॥
नास्ति उपादु निरोधु नरस्यो
एविमि धर्म सदा विविक्ताः ।
एव प्रजानतु नो परिहाणि
राज लभी अनुत्पत्तिकक्षान्तिम् ॥४१॥
राज तदा विजहित्वन राज्यं[4]
प्रव्रजि शासनि तस्य [जिनस्य] ।
तेऽप्यनुप्रव्रजिताः सुत राज्ञः
पञ्चशतानि[5] अनूनक सर्वे ॥४२॥
प्रव्रजितो यद राज[6] सपुत्रो
अन्य तदा बहु प्राणिसहस्राः ।
प्रव्रजिताः सुगतस्य समीपे
धर्म गवेषिषु तस्य जिनस्य ॥४३॥

1 A एव तवा चरणेसु पतामी ; B तवा चरणेषु प्रणामि ; Tib. 236b, l. 2: ཁྱོད་ཀྱི་ཞབས་ལ་བདག་ནི་ཕྱག་འཚལ་ལོ། །

2 C प्राण throughout

3 A लभेत् सु

4 B राज

5 A शता

6 A राज्ञ

विंशतिवर्षशतान् परिपूर्णान्
धर्म प्रकाशितु तेन जिनेना ।
राज सपुत्रकु तेन जनेना[1]
विंशतिवर्षशता चरि धर्मम्[2] ॥४४॥
अथ अपरेण[3] पुनः समयेन
सोऽपि जिनः परि[नि]र्वृतु आसीत् ।
ये जिनश्रावक तेऽपि [अतीताः]
सोऽपि च धर्मु परित्तकु[4] आसीत् ॥४५॥
तस्य च राजिन[5] पुत्र अभूषी
पुण्यमती सद श्राद्धु[6] प्रसन्नः ।
तस्य च भिक्षु कुलोपगु[7] आसीत्
सो इमु देशयि शान्तसमाधिम् ॥४६॥
सो अखिलो मधुरो च अभूषी
सत्कृतु प्राणिसहस्रशतेभिः ।

1 A ०कु सार्द्धं जनेन ; C तैन जिनना
2 A शतांश्चरि धर्मान् ; B ०शताश्चरि धर्मं
3 B अथापरेण
4 B परीत्यक्कु ; Tib. 237a, l. 1:
དེ་ཡི་ཆོས་རྣམས་ཀུན་ནི་ཉུང་བར་གྱུར། །
5 C राजनु
6 B ०मती तद श्राद्ध ; C तद राज ; Tib. 237a, l. 2:
བསོད་ནམས་བློ་གྲོས་དད་ཅིང་དང་བ་སྟེ། །
7 A ०कु ; B भिक्षुकुलापकु

देवत कोटिशतान्यनुबद्धा

वर्ण भणन्ति कुलान् प्रविशित्वा ॥४७॥

स स्मृतिमान् मतिमान् गतिमांश्चो

सुव्रतु सूरतु शीलरतश्च ।

सुस्वरु[1] अपरुष सो मधुरश्चो

धातुषु ज्ञानवशीवर[2]प्राप्तः ॥४८॥

चीवरकोटिशतान च लाभी

आसि स भिक्षु यशप्रभु नाम्ना[3] ।

तस्य च पुण्यबलं असहन्ता[4]

भिक्षुसहस्र तदा जनि ईर्षाम्[5] ॥४९॥

पुण्यबलेन च रूपबलेन

ज्ञानबलेन च ऋद्धिबलेन ।

शीलबलेन समाधिबलेनो

धर्मबलेन समुद्गतभिक्षुः ॥५०॥

हृष्टमनश्च प्रियश्च जनस्यो

भिक्षु-उपासक-भिक्षुणिकानाम् ।

ये जिनशासनि सत्त्व प्र[स]न्ना-

स्तेषमभीप्सित[6] पूजनि[या]श्च ॥५१॥

1 A अप्यरूषो ; B अपसरुषं ; C अपसरू Tib. 237a, l. 4:
དབྱངས་ཀྱང་སྙན་ཅིང་མི་རྩུབ་འཇམ་པ་སྟེ།

2 C पर

3 A यशःप्रभुनामा ; B यशप्रभुनामा

4 A असहन्ती

5 A ईष्या ; B ईर्ष्याः

6 A स्तेष अभीप्सितु ; B तेसमभीप्सितु ; C स्तेसमा०

यश्च स राजिनु पुत्रु अभूषी
पुण्यमती सद श्राद्धु[1] प्रसन्नः।
ज्ञात्व प्रदुष्टमनान् बहुभिक्षु[2]
रक्ष स कारयि आचरियस्य ॥५२॥

पंचहि प्राणिसहस्रशतेही
वर्मित खड्‌गगदायुधकेहि[3]।
तेहि सदा परिवारित भिक्षु-
र्भाषति भूतचरीमपर्यन्ताम् ॥५३॥

सो परिषाय प्रभाषति धर्मं[4]
शून्य निरात्म निर्जीवि[मि] धर्माः।
ये उपलम्भिक आत्मनिविष्टा-
स्तेष न रोचति यं भणि भिक्षुः ॥५४॥

उत्थितु भिक्षव शस्त्र गृहीत्वा
येष न रोचति[5] शून्यत शान्ताः।
एष अधर्म[6] प्रभाषति भिक्षुः
एतु हनित्व भविष्यति पुण्यम् ॥५५॥

दृष्ट्व च शस्त्र न भायति[7] भिक्षुः
शून्यक-[8]धर्ममनुस्मरमाणः।

1 A & B सदा श्राद्ध
2 C ज्ञातु प्रदुष्टमनाक् बहुभिक्षु
3 B ०केभिः
4 B सो पर्षाय प्रभाषति धर्मं ; C सो परिभाषय भाषति धर्मं
5 A रोच्यति
6 C एष सुधर्मु ; B एष धर्मं
7 B & C भाषति
8 C धर्म अनु०

नास्तिह सत्त्व नरो वापहत्यै[1]
कुडयसमा[2] इमि रिक्तकधर्माः ॥५६॥
भिक्षु करोति स अञ्जलि मूर्ध्ना
भाषति वाच नमोऽस्तु जिनानाम् ।
येन सत्येनिमि शून्यक धर्मा
भोन्तिमि शस्त्र मान्दारवपुष्पाः ॥५७॥
शीलव्रतोपगतस्य मुनिस्यो
भाषित[3] मात्र अनन्यथ वाक्ये ।
कम्पित मेदिनि सवनषण्डा
शस्त्र ते जात मान्दारवपुष्पाः ॥५८॥
भिक्षु अभूत्तद मंकुशरीरा
ये उपलम्भिक शस्त्रगृहीताः ।
भूयु नु शक्युपसंक्रमणाये[4]
त्रस्त अभूत सुमहाद्भुत[5]जाताः ॥५९॥

1 A & B नरो च य हन्ये

2 A & B कु असमा ; C कुन्यसमा ; Tib. 237b, l. 5:
འདི་ལ་སེམས་ཅན་སྐྱེས་བུ་གསོད་པ་མེད །
ཆོས་འདི་རྣམས་ནི་གསོབ་སྟེ་རྩིག་པ་འདྲ །

3 A & B भाषित मात्रि ; C भाषति मान्य

4 C भूय नु शक्क पसंक्रमणाये

5 C तत्र अभूत् सुमदादय जाताः ; Tib. 238a, l. 1:
སྐྲག་ཅིང་ཤིན་ཏུ་ངོ་མཚར་ཆེན་པོར་གྱུར །

ये पुन[1] श्राद्ध प्रसन्न मुनीन्द्रे
येषिह[2] रोचति शून्यत शान्ता।
तेहि हुङ्कारसहस्र करित्वा
दुष्यशतैरभिच्छादित भिक्षुः ॥६०॥

भिक्षु [3]जनित्वन मैत्र स तेषु
सर्वजनस्य[4] पुरस्त भणाति।
ये मयि सत्त्व प्रदोष करोन्ती
तेष कृतेनहु बोधि चरामि ॥६१॥

तेन च वर्ष अशीतिरनूना
भाषित शून्यत कोशु[5] जिनानाम्।
भिक्षुसहस्रप्रत्यर्थिक आसन्[6]
ये[7] च निवारित राजसुतेन ॥६२॥

सोऽपि तदा परिभूत अ[भू]षी
तस्य च भिक्षु परीत्तकु[8] आ[सन्]।
वा[च]मनिष्ट तदा श्रुणमानः
क्षान्तिबला च्युत नो च कदाचित्[9] ॥६३॥

1 A ये नच ; B ये नर
2 A येषिय ; B येषि'
3 C जनेत्व
4 B जगस्य
5 B ०कोश्रु ; Tib, 238a, l. 4:
སྟོང་པ་རྒྱལ་བ་རྣམས་ཀྱི་མཛོད་བཤད་དེ།
6 A & B ०सहस्रपलम्भिक श्रासीद्
7 Mss. येन
8 C परित्तकु ; B परीत्तक
9 C बलातु·च्युत नो कदा०

सोऽपरेण [च] पुनः समयेन[1]

प्राणिशतान करी महदर्थम् ।

शीलमखिलम[2]नुस्मरमाणः

पुण्यमतिस्य तदा भणि वाचम्[3] ॥६४॥

तत्र सगौरवु कृत्व उदारं

पुण्यमती अवची तद भिक्षुम् ।

मा मम केनचिदाचरियस्यो[4]

चेतसि किं[चि] कृतं अमनापम् ॥६५॥

सो अवची शृणु राजकुमारा

क्षान्तिबलेन समुद्गत-बुद्धाः ।

येन मि भाषिता वाचमनिष्टा-

स्तस्यिमि अन्तिकि मैत्र उदाराः ॥६६॥

येन स कल्पसहस्रशतानि

क्षान्ति निषेवित पूर्वभवेषु ।

सो अहु भिक्षु यशप्रभु आसं

शाक्यमुनिर्भगवान् भणि वाचम् ॥६७॥

येन यशप्रभु रक्षितु भिक्षुः

पुण्यमती[5] [तद] राजिनु पुत्रः ।

1 B ०ना

2 A, B & Tib. धर्ममचिन्त्यम० ; C शीलमच्छिलम

3 A, B & Tib. 238a, l. 6: पुण्यमती जनयी मह प्रेमं

4 B केन चि आचरियस्यो

5 C पुण्यावती

जातिसहस्र ममासि सहायः
सो मय व्याकृतु मैत्रकु बुद्धः ॥६८॥
येन गणेश्वर पूजितु शास्ता
येन तु कारित श्रेष्ठविहाराः ।
पूर्वमसौ वरपुष्पसुनामा
सो पद्मोत्तरु आसि मुनीन्द्रः[1] ॥६९॥
एव मया बहु कल्प अनन्ता
[2]धारयितामिमु धर्म जिनानाम् ।
क्षान्तिबलं[3] समुदानितपूर्वे
श्रुत्व कुमार ममा अनुशिक्षाः[4] ॥७०॥
निर्वृतिमप्यथ भेष्यति एवं
पश्चिमि [कालि सद्धर्मविलोपे[5] ।
भिक्षु व तीर्थमतेष्वभियुक्ता
ते मम धर्म प्रतिक्षिपि शान्तम् ॥७१॥
उन्नत उद्धत दुष्ट प्रगल्भा
पापसहायक भोजनलुब्धाः ।
चीवरपात्ररताः पटलुब्धाः
लाभ संनिश्रि]त ते क्षिपि धर्मम् ॥७२॥
दुष्टप्रदुष्टमना अकृतज्ञा
हीनकुलेषु[6] दरिद्रकुलेषु ।

1 A सो पदुत्त आसि नरेन्द्राः ; B सो पदुत्तम आसि नरेन्द्रैः
2 A अनन्तो धारयता० ; B धारयता 3 B क्षान्तिबलेन
4 A & B अनुशिक्षो ; C मना अत 5 A & B विलाये 6 B adds च

प्रव्रजिता इह शासनि मह्यं
तेऽपि प्रतिक्षिपि शा[न्तमु] धर्मम् ॥७३॥
मारमतेन च मोहित सत्त्वा
रागवशानुगताभिनिविष्टाः[1] ।
मोहवशेन तु[2] मोहित बाला
येष न रोचति शून्यत शान्तः[3] ॥७४॥
भिक्षु च भिक्षुणिका गृहिण[श्चो]
[ग्राहित] मोहित [4]पाप[मती]भिः ।
[तेष] वशानुगता सद भूत्वा
पश्चिमि कालि प्रतिक्षिपि [बोधिम् ॥७५॥
श्रुत्व कुमार इमा मम वाचं
भिक्षु अरण्यकुले वसि नित्यम् ।
येषिय रोचति शून्यत शान्ताः
तैरयु धारितु धर्मु जिनानाम् ॥७६॥
प्रव्रजि ते मम शासनि चरित्व[5]
भिक्षु-उपसंपद-पोषध-कर्मं] ।

1 C मारवशानुगता विनिविष्टाः 2 C रागवशेन तु

3 A येष न सव्रति शून्यत शान्तिं ; B ये जन सेवति शून्यत शान्ता

4 A सोप० ; B ग्रहीत मोहितमोप०

5 A प्रव्रजि ता मम शासनि चरित्व उपसंपद ; B सासनि तेभूभिक्षव सम्पद पो० ;
Tib. 239a, l. 5:

དེ་དག་ང་ཡི་བསྟན་ལ་རབ་བྱུང་ཞིང །
དགེ་སློང་བསྙེན་རྫོགས་གསོ་སྦྱོང་ལས་རྣམས་བྱས །

भुंजिमु पिण्डमसक्ता अदुष्टा[1]
ये इमु धारयिष्यन्ति समाधिम् ॥७७॥
जीवित काय अपेक्षि प्रहाया
शून्यता भावयथा सुप्रशान्ताम्[2] ।
युक्त-प्रयुक्तमना[3] च भवित्वा
सेव अरण्य सदा मृगभूताः ॥७८॥
नित्य करोथ च पूज जिनानां
छत्रध्वजर्द्धिय[4] माल्यविहारैः ।
चेतिय पूजयथा सुगतानां[5]
क्षिप्र लभिष्यथ[6] एतु समाधिम् ॥७९॥
स्तूप करापयथा सुगतानां
हेमविभूषित रूपिय लिप्तान्[7] ।
प्रतिम[8] सुनिष्ठित रत्नविचित्रा
बोधिनिदानु[9] ज[नित्वन] चित्तम् ॥८०॥

1 A असक्तमगृद्धा ; B भुञ्जितमु पिण्ड असक्तमगृद्धा ; Tib. 239a, l. 5:
ཟས་ལ་མི་ཆགས་མི་བརྐམ་ཟ་བ་ཡིན། ।

2 B ०शान्तः 3 A ०मनो

4 B ०ध्वजार्द्धिय ; C ०ध्वागृहाय

5 Mss. प्रतिमानां ; Tib. 239a, l. 7:
བདེ་བར་གཤེགས་པའི་མཆོད་རྟེན་མཆོད་པར་གྱིས། ।

6 A लभिष्यसि ; B ०ष्यति 7 C ०विभूषिय

8 B प्रतिमे

9 Mss. बोधिनिधातु ; Tib. 239b, l. 2:
བྱང་ཆུབ་ཕྱིར་ནི་ཡི་དམ་བཅའ་གྱིས་ལ། ।

यावति पूज जगेस्मि प्रणीता
दिव्यथ मानुषिका रमणीया।
सर्व गवेषिय बुद्ध महेथा
बोधिनिदानु[1] करित्व प्रतिज्ञाम् ॥८१॥

धर्म[त] पश्यथ सर्वि नरेन्द्रान्
यावत सन्ति दश दिशि लोके।
दृश्यति निर्वृति सर्व[2] जिनानां
धर्मतया स्थित संमुख बुद्धाः ॥८२॥

भोथ च सर्विषु त्यागाधिमुक्ताः
शीलविशुद्धगता स्थिरचित्ताः।
क्षान्तिरताः सद मैत्ररताश्चो
सर्वि प्रजानथ शून्यक धर्मान्[3] ॥८३॥

वीर्यु जनेथ अलीन अदीनाः
ध्यानरताः प्रविवेकरताश्च।
प्रज्ञा प्रजानथ प्रज्ञविशुद्धिं
भेष्यथ कारु[णि]का न चिरेण ॥८४॥

रागु शमेथ सदा अशुभा [ये]
दोषु निगृह्णथ [4]क्षान्तिबलेन।
मोहु निगृह्णथ प्रज्ञबलेना
प्राप्स्यथ बोधि जिनानु प्रशस्ताम् ॥८५॥

1 A & C निधानु
2 A & B सर्वि
3 A मैत्ररता करुणाया चरथ शून्यकधर्मा
4 B दोष निगृह्णथ मैत्र०

कायु विभावयथा यथ फेनं
दुःखमसारकु पूतिदुर्गन्धम् ।
स्कन्ध प्रजानथ रिक्तक[1] सर्वाँ-
ल्लप्स्यथ ज्ञानमनुत्तरु क्षिप्रम् ॥८६॥
दृष्टि म गृह्णथ पापिक जातु
आत्म अयं पुरुषो अथ[2] जीवः ।
सर्वि प्रजानथ शून्यक धर्मान्
क्षिप्र स्पृशिष्यथ उत्तमबोधिम् ॥८७॥
लाभ म कुर्वथ गृद्धो कदाचित्[3]
मा परितप्यथ पिण्डमलब्ध्वा[4] ।
निन्दित शंसित मा खु चलेथा
मेरुसमाश्च अकंपिय भोथा ॥८८॥
धर्म गवेषथ गौरवजाताः
श्रुत्व तदापि च तत्पर भोथ[5] ।
तिष्ठथ गोचरि सर्वजिनानां
यास्यथ क्षिप्र[6] सुखावति क्षेत्रम् ॥८९॥
सर्व जगे समचित्त भवित्वा
अप्रिय मा प्रिय[7] चित्तु करोथ ।

1 B ऋक्तक सर्वा लप्स्यथ
2 A drops अथ ; B ०षोथ च
3 A गृद्धु कदाचि
4 A ०थ निरयगतः
5 B तत्सम
6 A & B सर्वि
7 A & B अप्रियु मा प्रियु

मा च गवेषथ लाभु यशो वा

क्षिप्र भविष्यथ बुद्ध मुनीन्द्राः ॥९०॥

बुद्ध[गु]णांश्च प्रभाषथ[1] नित्यं

भूतगुणेहि[2] निरुक्ति[3]पदेहि ।

यान्[4] गुण श्रुत्विह सत्त्व[5] प्रसन्नाः

बुद्धगुणेषु स्पृहां जनयेयुः ॥९१॥

नित्य सगौरव चाचरियेषु[6]

मातु पितुस्तथ सर्वजगस्मिन् ।

मा पुन मानवशानुग भोथा

लप्स्यथ लक्षण त्रिंश दुवे च ॥९२॥

संगणिकां विजहित्व अशेषां

नित्यु विवेकरतापि च भोथ ।

सूरत नित्युपशोभन[7] शान्ता

आत्महिताः परसत्त्वहिताश्च ॥९३॥

मैत्रि[8] निषेवि तथा करुणां चो

[मु]दितुपेक्षरताः सद भोथ ।

शास्तुः प्रशासनु पश्यथ[9] नित्यं

भेष्यथ क्षिप्र हितंकरु लोके ॥९४॥

1 A & C प्रभाषति

2 C ०गुणेपि ; B भूतगुणेहिं

3 B निरुक्त०

4 A यां

5 B सर्वे

6 C आचर्येषु

7 A & B सूरत सूव्रत नित्युप० ; Tib. 240a, l. 7:

ངེས་ཤིང་བརྟུལ་ཞུགས་བཟང་ལ་རྟག་ཏུ་ཞི །

8 A मैत्र

9 B & C शास्त्र प्रकाशनु०

पापकमित्र म जातु भवेथ[1]
सेवथ मित्र ये भोन्ति उदाराः ।
येषिह्[2] रोचति शून्यत शान्ता
ये[3] अभिप्रस्थिता उत्तमबोधिम् ॥९५॥
श्रावकभूमि म शिक्षथ जातु[4]
मा च स्पृहेष्यथ[5] तत्र चरी ये ।
चित्तु म रिंचथ बुद्धगुणेषु
क्षिप्र भविष्यथ बुद्धजिनेन्द्राः ॥९६॥
सत्यगिरं सद भाषथ शुद्धां
मा मृष[6] भाषथ मा परुषां च ।
नित्य प्रियं मधुरं च भणेथा
लप्स्यथ वाच लोकाचरियाणाम्[7] ॥९७॥
कायि[8] अनर्थिक जीवित भोथा
मात्म उत्कर्षक मा परपंसी[9] ।
आत्मगुणान् समुदानयमानाः[10]
परचरियासु उपेक्षक भोथ[11] ॥९८॥

1 A ओजेथा ; B भवेथा
2 A & B येषिय
3 A कत ; B ते
4 A शिक्षिता जातू
5 A & B स्पृशेषथ
6 A मृषा च ; B मा परुषाश्च
7 A & C चरिकाणां
8 C नापि
9 A उत्कर्ष मा पुरुषंशी ; B आत्म उत्कर्षथ ; C परुपंसी
10 A ०माना ; C ०मान ; Tib. 240b, l. 5:
གཞན་ལ་སྨད་ཅིང་བདག་ལ་བསྟོད་མ་བྱེད། །
བདག་གི་ཡོན་ཏན་ཡང་དག་སྒྲུབ་ཀྱིས་ལ། །
11 A परिचरियासु उपेक्ष करोथा ; C परचर्यासु ; B कारोथ

शून्य विमोक्षरताः सद भोथा
मा प्रणिधान करोथ गतीषु ।
सर्वनिमित्त विवर्ज्य अशेषां
भोथ सदा अनिमित्तविहारी ॥९९॥

अन्त विवर्जयथा[1] सद कालं
[2]शाश्वतुच्छेदस्थिता म भवाथ ।
प्रत्ययता सद बुध्यत सर्वं
एव[3] भविष्यथ यादृश शास्ता ॥१००॥

कामरतीषु[4] रतिं विजहित्वा
दोषखिलांश्च मलान्[5] विजहित्वा ।
मोहतमो विजहित्वन[6] सर्वं
[7]शान्तरता नरसिंह भवाथ ॥१०१॥

नित्यमनित्य च पश्यथ नित्यं
सर्व भवा[8]सुखदुःख विमुच्य ।
अशुभमनात्मत आत्मशुभेषु
भावयमानु भवेय नरेन्द्रः[9] ॥१०२॥

1 B अन्त विवर्जयथा ; C विवर्जियथा ;
2 B & C शाश्वत उच्छेद
3 A सर्वं ; B सर्वमेव ; C सत्वं एष
4 B कामचरीषु
5 C दोषरतांश्चमलां
6 C ०हित्वसे सर्वं
7 A शान्ति
8 A & B ०भवाः
9 A नरेन्द्राः ; B मान भवेथ न०

लोकप्रदीपकरेभि जिनेभि-
येंषिह्[1] योनिशो[2] धर्म सुनीत[3] ।
तैरिह मारबलानि हनित्वा
प्राप्तमनुत्तरबोधिरुदाराः[4] ॥१०३॥

यात्तक[5] भाषित एति गुणा मे
ये च प्रकाशित दोषशता मे ।
दोष विवर्जिय शिक्ष[6] गुणेषु
भेष्यसि बुद्धु तदेह कुमार[7] ॥१०४॥

इति श्रीसमाधिराजे [8]यशःप्रभपरिवर्तः
सप्तत्रिंशतितमः ॥३७॥

1 A येषिय ; B पणिय
2 Mss. योनिशु ; Tib. 241a, l. l, 3:
འཇིག་རྟེན་སྒྲོན་མཛད་རྒྱལ་བ་རྣམས་ཀྱིས་ནི །
གང་ལ་ཚུལ་བཞིན་ཆོས་རྣམས་རབ་བསྟན་པ །
3 B धम्मु सुनीताः
4 A प्राप्त उदारा अनुत्तरु बोधिः ।
5 B यान्तिक
6 A & C शिष्य
7 A & B कुमाराः
8 A drops प्रभ

अष्टत्रिंशपरिवर्तः

[1]तस्मात्तर्हि कुमार कायसंवरसंवृतो भविष्यामीत्येवं त्वया कुमार शिक्षितव्यम्[2]। तत्र कुमार कतमः कायसंवरः। येन कायसंवरेण समन्वागतो बोधिसत्त्वो महासत्त्वः सर्वधर्मेष्व-संगज्ञानं प्रतिलभते। अयमुच्यते [कुमार] कायसंवर इति। येन कायसंवरेण समन्वागतो बोधिसत्त्वो महासत्त्वो द्वात्रिंश-न्महापुरुषलक्षणानि प्र०[3]। अयमुच्यते[4]...इति। येन...महासत्त्वो[5] दशतथागतबलानि चत्वारि वैशारद्यानि अष्टादशावेणिकान् बुद्ध-धर्मान् प्र०। अयमुच्यते...इति। येन...महासत्त्वस्त्रीणि विमोक्ष-मुखानि प्र०। कतमानि त्रीणि। यदुत शून्यतामनिमित्तमप्रणि-हितम्। इमानि त्रीणि विमोक्षमुखानि। अयमुच्यते...इति। येन ...महासत्त्वश्चतुरो ब्राह्मान् विहारान् प्र०। कतमांश्चतुरः[6]। यदुत मैत्रीं करुणां मुदितामुपेक्षामिमांश्चतुरो ब्राह्मान् विहारान्। अय-मुच्यते...इति। येन...महासत्त्वश्चतस्रः प्रतिसंविदः। कतमा-श्चतस्रः। यदुतार्थप्रतिसंवित् धर्मप्रतिसंवित् निरुक्तिप्रतिसंवित्

1 A & B add तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म।

2 B सदा शिक्षि०

3 प्र०=प्रतिलभते

4 अयमुच्यते...इति। येन...महासत्त्वः = अयमुच्यते कुमार कायसंवर इति। येन कायसंवरेण समन्वागतो बोधिसत्त्वो महासत्त्वः

5 B adds ०सत्त्वः अशीत्यनुव्यञ्जनानि प्र०। अयमुच्यते...इति। येन...महासत्त्वो दश०

6 B ०चत्वारो महाब्रह्मविहारान्। कतमानि स चतुरः। महामैत्रीं महाकरुणां महा-मुदितां महोपेक्षामिमांश्चत्वारो महाब्रह्मविहारान्

प्रतिभानप्रतिसंविदिमाश्चतस्रः प्रतिसंविदः । अयमुच्यते[1]...इति । येन...महासत्त्वः सप्तत्रिंशद्बोधिपक्षान् धर्मान् प्र० । कतमान्[2] सप्तत्रिंशत् । यदुत चत्वारि स्मृत्युपस्थानानि । चत्वारि सम्यक् प्रहाणानि । चतुर[3] ऋद्धिपादान् । पञ्चेन्द्रियानि । पञ्च-बलानि । सप्त बोध्यङ्गानि । आर्याष्टाङ्गिकं मार्गम्[4]। इमान् सप्तत्रिंशद्बोधिपक्षान् धर्मान् । अयमुच्यते...इति । येन... महासत्त्वो महाकरुणाविहारं प्र० । महोपेक्षाविहारं प्र०[5] । क्षेमांश्च वितर्कान् प्र० । प्रविवेकांश्च धर्मान्[6] प्र० । अयमुच्यते कायसंवर इति ।

पुनरपरं कुमार येन कायसंवरेण समन्वागतो बोधिसत्त्वो महासत्त्वः प्राणातिपातात् प्रतिविरतो भवति । अदत्तादानाद्-ब्रह्मचर्यान्मृषावादात् पिशुनवचनात् परुषवचनात् संभिन्नप्रलापा-दभिध्यायाद्[7] व्यापादान्मिथ्यादृष्टेः प्रतिविरतो भवति । तुला[8]-

1 See p. 589, fn. 4.

2 B कतमानि

3 C चत्वार

4 A & B अष्टाङ्गमार्ग

5 A & B add महासत्त्वो महामैत्रीविहारं प्र०...महामुदिताविहारं प्रः । Tib. 242a, l. 6, follows C and does not mention these two terms.

6 Mss. वितर्कान् ; Tib. 242a, l. 7:

བདེ་བའི་རྣམ་པར་རྟོག་པ་སྤོབ་པ། རབ་ཏུ་དབེན་པའི་ཆོས་རྣམས་སྤོབ་པར་འགྱུར་བ།

7 A अभिध्यायाः

8 Tib. 242b, l. 2:

སྲང་ལ་གཡོ་བྱེད་པ།

कूटा[न्मानकूटा][1]त्कांस्य[2]कूटात् [3]कर्षणबन्धनरोधनताडन[4]च्छेदन-भेदनविपरामोषालोपसाहसेभ्यः प्रतिविरतो भवति[5] । न हस्तलोलः न पादलोलो हस्तपादसंयतः। तस्य सर्वं काय[वाङ्]मनोदौष्ठुल्यं प्रहीणं भवत्युच्छिन्नमूलं तालमस्तक[6]वदायत्यामनुत्पाद-धर्मि । अयमुच्यते [कुमार] कायसंवर इति । तदनेनापि [ते] कुमार पर्यायेणैवं वेदितव्यम् ।

1 Tib. 242b, l. 2:

ཚད་ལ་གཡོ་བྱེད་པ །

2 A & C वस्त्र ; B वस्तु ; cf. Bodhisattvabhūmi (Wogīhara), p. 28: कांसकूट-तुलाकूटादिभिः ; Tib. 242b, l. 3:

ནོར་ལ་གཡོ་བྱེད་པ །

3 Mss. कर्षणवर्धन॰ ; Tib. 242b, l. 3:

བརྡུང་བ་དང ། བཅིང་བ་དང ། བཙའ་བ་དང ། བརྡེག་པ་དང ། བསྡིགས་པ་དང ། བཅད་པ་དང ། དབུག་པ་དང ། ཞིལ་གནོན་པ་དང ། ཆགས་པ་དང ། མེར་སྣ་སྣངས་པར་འགྱུར་བ་དང །

4 A ताडनतर्जन

5 Cf. *Dīgha Nikāya*, 1. p. 5: तुलाकूट-कंसकूट-मानकूटा विरतो समणो गोतमो......छेदन-वध-बन्धन-विपरामोस-आलोपसहसाकारो पटिविरतो समणो गोतमो । A, B & C ॰परामर्श॰

6 C तालसप्तक ; Pāli तालवत्थुकतं ; Mahāvastu III, 360 l. 1.: (sic. का) तालवस्तु cf. *Aṅguttara Nikāya*, 1, p. 135: पहीनं होति उच्छिन्नमूलं तालावत्थुकतमनभावकतं आयतिमनुप्पादधम्मम् ।

Tib. 222b, ll. 4-5:

ད་ལ་འདི་མགོ་བཅད་པ་བཞིན་དུ་མ་འོངས་པའི་དུས་མི་སྐྱེ་བའི་ཆོས་ཅན་དུ་འགྱུར་བ །

भूतपूर्वं कुमारातीतेऽध्वन्य[संख्येये कल्पे अ]संख्येयतरे विपुले अप्रमाणे अचिन्त्ये[1] अपरिमाणे यदासीत्तेन कालेन तेन समयेन ज्ञानप्रभासो नाम तथागतोऽर्हन् सम्यक्संबुद्धो लोक उदपादि विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्। तेन खलु पुनः कुमार कालेन तेन समयेन तस्य भ[ग]वतो ज्ञानप्रभासस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य षष्टिवर्षकोट्यः आयुष्प्रमाणमभूत्। [2]षष्टिरर्हत्कोट्यः श्रावकसंघोऽभूत्। अप्रमेयाश्च बोधिसत्त्वा [महासत्त्वा] सद्धर्मपरिग्राहका अभूवन्। तेन च कुमार कालेन तेन समयेन राजाभूद्विशेषचिन्ती नाम।

अथ खलु राजा विशेषचिन्ती अशीत्या प्राणिकोटिभिः सार्धं तथागतमुपसंक्रान्तः। उपसंक्रम्य तस्य तथागतस्य पादौ शिरसाभिवन्द्य भगवन्तं त्रिः प्रदक्षिणीकृत्यैकान्ते न्यषीदत्। एकान्तनिषण्णश्च राजा विशेषचिन्ती तं तथागतं पर्युपास्ते। अथ खलु कुमार ज्ञानप्रभासस्तथागतोऽर्हन् सम्यक्संबुद्धो राज्ञो विशेषचिन्तिनः सपरिवारस्याध्याशयं विदित्वा इतो धर्मपर्यायादिमं कायसंवरसमाधिमुखप्रवेशं गाथाभिगीतेन देशयति[3]।

यथान्तरीक्षं गगनं विशुद्ध-
मत्यन्तशुद्धं प्रकृतिप्रभास्वरम्[4]।

1 A अचिन्त्येऽतुल्ये 2 A & B षष्टिश्चार्हत्
3 A & B गीतेन विस्तरेण संप्रकाशयति स्म।
4 Cf. *Mahāyāna Sūtrālaṅkāra*, p. 88

एमेव शुद्धो अयु कायसंवरो
न शक्यु घोषेण कदाचि देशितुम् ॥१॥
विविक्तु शून्यो अयु कायसंवरो
एतादृशे[1] ते उभि कायलक्षणे ।
[2]अलक्षण[ास्ते] यथ अन्तरीक्षं
तल्लक्षणो देशितु कायसंवरः ॥२॥
यो जानती[3] संवरमेवलक्षणं
न तस्य जातु[4] भवती असंवरः[5] ।
ये चाप्रवृत्ताः कुतु तेष[6] गोचरो[7]
अनास्रवस्यो[8] उपपत्ति नास्ति ॥३॥
न शक्यु[9] कामान् प्रतिसेवमानै
रूपेषु भोगेषु जनित्व[10] तृष्णाम्[11] ।
भवेषु दोषानविजानमानै
न शक्यु[9] ज्ञातुमयु कायसंवरः ॥४॥

1 B एका दृश्यते
2 B drops अलक्षणा॰
3 A जानी ; B जानाती
4 A & B जातू
5 Mss न संवर
6 A & B ये चापि वृत्ताः कुतु तेषु ; Tib. 243b, l. 3
मི་འཇུག་དེ་ཡི་སྤྱོད་ཡུལ་ག་ལ་ཡིན། ।
ཟག་པ་མེད་པ་ལ་ནི་སྐྱེ་བ་མེད། ।
7 B गोचरा
8 A & B अनाश्रविस्या
9 A & B न चक्षु
10 Mss जह्नित्व
11 B तृष्णाः

अनास्रवं संवरु यः प्रजानते[1]
न तस्य भोती उपपत्ति जातु ।
अर्हन्तधर्मा इम एवरूपाः
न सुकरं जानितु[2] तीर्थिकेभिः ॥५॥

ये सर्व[3] त्रैधातुकि त्रस्तमानसा
न कामभोगेषु स्पृहां जनेन्ति ।
राज्येन[4] भोगैश्च न जातु अर्थिका
ज्ञास्यन्ति ते ईदृश कायसंवरः[5] ॥६॥

[6]अर्थो अयं वुच्चति कायसंवरो
[अर्थश्च शब्देन न शक्यु देशितुम् ।
यो जानती ईदृशु धर्मनेत्री
स संवरेऽस्मिन्[7] भवति प्रतिष्ठितः ॥७॥

अर्थे प्रयुक्तान मयार्थु देशितो
ये अर्थनेत्रीपरता[8] विचक्षणाः ।

1 A संवररूयः जानती ; B प्रजानती

2 A सूकरः यानितु तीर्थिकेहि ; B सूरकर' जानितु ; C जानित्व

3 A सर्वि

4 A राजा न

5 A न ज्ञास्यते ईदुशु ; B ईदृशं कायः

6 Tib. 243b, l. 6:

ལུས་ཀྱི་སྡོམ་པ་འདི་ནི་དོན་ཅེས་བྱ །
དོན་ནི་སྒྲ་ཡིས་བསྟན་པར་མི་ནུས་ཏེ །

7 C ०नेत्री स संवरस्मिन्

8 A & B धर्मनेत्री ; C ०रतना

अनर्थु[1] वर्जेन्ति य अर्थयुक्ता
ते संवरस्मिन् सततं प्रतिष्ठिताः ॥८॥
अर्थो य[2] उक्तो हि जिनान शासने
कथं स[3] अर्थो भवती विजानतो[4] ।
यो अर्थनेत्रीय स्वभावु जानति
प्रतिष्ठितः सोच्यति कायसंवरे ॥९॥
येनानिमित्तं भवती विजानितं
नैरात्म्यतः शून्यतु[5] तुच्छतो वा ।
न तस्य जातू भवती असंवर[6]-
स्तथाहि सो शिक्षितु भूतनिश्चये ॥१०॥
भावानभावानिति यः प्रजानति
स सर्वभावेषु न जातु सज्जते ।
यः सर्वभावेषु न जातु सज्जते
स आनिमित्तं स्पृशती समाधिम् ॥११॥
विज्ञात येनेह निरात्मधर्माः[7]
स्वभावशून्याः प्रकृतिप्रभास्वराः ।
न तस्य जातु भवती[8] असंवर-
स्तथाहि सो शिक्षितु[9] भूतनिश्चये ॥१२॥

1 A & B अनर्थ
2 Mss. क
3 Mss. च
4 A विजानीयो ; B विजानितो
5 A & B शून्यत
6 Mss. न संवर
7 A निरात्मभावी ; B निरात्मनिधर्मा
8 A & B सवुति
9 A निश्चि ; B सो निश्चिंत

यो जानती शून्यत[1] पञ्चस्कन्धान्
विदित्व नैरात्म्यस्वभाव-शून्यान् ।
न तस्य जातु भवती[2] असंवरो
यत् कर्म कायेन समाचरेत ॥१३॥

निमित्त-ग्राहिस्य असंवृतस्य[3]
[य] आत्मसंज्ञाय सदा प्रतिष्ठितः ।
रूपेषु आस्वादगतस्य जन्तुनः
प्रकुप्यते राग[4] असंवृतस्य ॥१४॥

ये भूतकोटीय भवन्ति शिक्षिता
गतिंगताः सूरत[5] शून्यतायाम् ।
न तेष रागः पुन जातु कुप्यते
असंवरो येन व्रजेत[6] दुर्गतिम् ॥१५॥

न शक्यु कम्पेतु[7] यथा सुमेरु
अचालियः सर्वपिपीलिकैर्महान् ।
तथा विदू भूतनयेषु[8] शिक्षितो
रूपेहि[9] दिव्यैरपि सो न कम्पते ॥१६॥

शक्येत रङ्गैर्गगनं विचित्रितुं
शक्येत चाकाश गृहीतु पाणिना ।

1 A & B शून्यक
2 A & B भवति
3 A असंवरस्य
4 A & B रागु
5 A & B शूरतु ; C शूरयः
6 C व्रजेय ; B व्रजेष दुर्गतिः
7 A कम्पेय ; B कर्मान् पेतु
8 C भूतनयैसु
9 A रूपैर्हि

न त्वेव शक्यं स विचालनाय
  रागेण दोषेण न [च] मारकोटिभिः ॥१७॥
प्रतिश्रुत्का[1] शक्यु गृहीतु[2] केनचि-
  च्छिला प्लवेद् [3]प्युदकस्य मध्ये
द्रष्टुं न शक्यं त्विह तस्य आशया[4]
  यः शिक्षितो ईदृशि कायसंवरे[5] ॥१८॥
यावन्त [6]शब्दाः पृथु सर्वलोके
  गृह्णित्व पेडागत[7] शक्य[8] कर्तुम् ।
न तस्य शक्यं [स्थितिर]स्थितिर्वा
  विजानितुं यः स्थितु कायसंवरे ॥१९॥
शक्यं प्रभा गृह्णितु सूर्यमण्डलात्[9]
  प्रगर्जतो मेघतु विद्युतो वा ।

1 Mss. प्रतिश्रुका
2 A & B ० ग्रहेतु
3 A दस्युदकस्य ; C ०प्लवेदह्युदक०
4 A विहतस्य ; B वितस्य आसयो ; C रिवनिहत्य आश्रयो ; Tib. 244b, l. 4:

དེ་ཡི་བསམ་པ་དག་ཀྱང་བལྟར་མི་ནུས། །

5 B ईदृशां कायसंवर
6 B यावन्ति Tib. 244b, ll. 4-5:

འཇིག་རྟེན་ཀུན་ན་སྒྲ་མང་ཇི་སྙེད་པ། །
བཟུང་སྟེ་སྒྲོམ་དུ་བཞུགས་པར་ནུས་གྱུར་ཀྱང་། །
ལུས་ཀྱི་སྡོམ་པའི་གནས་དང་མི་གནས་པ། །
སུས་ཀྱང་རྣམ་པར་རིག་པར་བྱེད་མི་ནུས། །

7 B गृह्णीत्व येडागतु
8 A ये तागति शक्यु
9 B गृह्णतु सूर्यमण्डं ; C ०मण्डली

न तस्य कायस्य स्वभाव ज्ञातु[1]
यः शिक्षितः स्यादिह कायसंवरे ॥२०॥
जालेन पाशेन च शक्यु बन्धितु
चतुर्दिशं वायति वातमण्डली ।
न शक्यमाजानितु तस्य कायः
प्रतिष्ठितो[2] यो इह कायसंवरे ॥२१॥
अगोचरोऽसाविह सर्वप्राणिनां
यत्र स्थितो यो विदु चित्तसंयमे[6] ।
यत्र स्थितो गोचरि कायसंवरे
न लिप्यते खमिव स लोकधर्मैः[4] ॥२२॥
शक्यं पदं पश्यितु[5] सर्वप्राणिनां
नभे चरन्तान पृथक् चतुर्दिशम्[6] ।
न तस्य कायस्य न चित्तगोचरो[7]
प्रमाणु ज्ञातुमिह शक्य[8] केनचित् ॥२३॥
एवं स्थितस्यो इह कायसंवरे
स[र्वे न भोन्ति विविधाः] किलेशाः ।
प्रहीण तस्येह [9]उपकिलेशा-
स्तथा ह्यसौ शिक्षितु कायसंवरे ॥२४॥

1 A स्वभावु जानितु ; B ज्ञातु
2 B प्रतिस्थितो
3 A & B स्थितो विदु कायसंवरे
4 ०धर्मैः
5 B पश्यतु
6 A नभे चरतो न पृथक् चतुर्दिशं ; C चं दर्शतुं
7 C गोचरे
8 A शक्यु ; B ज्ञातुमिह शक्यु
9 C उपे०

न तस्य अग्निः क्रमते न शस्त्रं
तथापि अग्राहुर[1] स तस्य कायः।
शा[न्त प्रशान्ते] स्थितु सो सम[ाधौ
तथा ह्य]सौ शिक्षितु कायसंवरे[2] ॥२५॥
एवं स्थितस्यो न भयं न त्रासो[3]
न क्षोभु चित्तस्यु न चेष्यु जायते।
मुक्तः स[4] सर्वेभिरुपद्रवेभि-
र्यः शिक्षितो तादृश[5] कायसंवरे ॥२६॥
विषस्य शस्त्रस्य न जातु भायति
न चाग्निमध्ये न जलस्य[6] मध्ये।
सर्वेहि मुक्तः स उपद्रवेहि[7]
यः शिक्षितो ईदृश कायसंवरे ॥२७॥
चौराण धूर्तान च पापकारिणा-
माशीविषा मध्यगतो न भायते[8]।
तथा[9]हि तस्यो विगतात्मसंज्ञा
संज्ञाविमुक्तस्य भयं न भोति ॥२८॥
भयैर्विमुक्तस्य न त्रासु जायते
असंत्रसन्तस्य[10] न भोति इञ्जना।

1 B अग्राह
2 A drops st. 25.
3 A त्रासं ; B न भयान्न त्रासो
4 A & C मुक्तस्य
5 A ईदृशि ; B ईदृशी
6 B drops ०स्य
7 A & B मध्ये। मुक्तः स सर्वेभिरुपद्रवेभि
8 A & B ०विषां मध्यगतो न भायति
9 A यथा ; C तत्रा
10 A अस्त्रस्य शस्त्रस्य ; B असस्त्रस्य न भोति

अनिंजमानस्य कुतोऽस्ति त्रासो[1]
न मारकोटीभिः स[2] शक्यु कम्पितुम् ॥२९॥
आचक्षितो देशितु संप्रकाशितो[3]
यो बोधिसत्त्वस्य[4] हिताय संवरः ।
यः शिक्षते ईदृश[5] कायसंवरे
सो भोति नो कम्पियु[6] मारकोटिभिः ॥३०॥
[सर्वेषु धर्मेषु असंज्ञ-ज्ञान
पूर्णा अशीतिरनुव्यञ्जनानि ।
द्वात्रिंश चो लक्षण चित्तशुद्धा
न दुर्लभा भोन्ति स्थितस्य संवरे] ॥३१॥
य इच्छते बुद्धितु[7] बुद्धधर्मान्
अचिन्तियान् येष[8] प्रमाणु नास्ति ।
स शिक्षितु ईदृशु[9] कायसंवरे
भविष्य ते चैतियु सर्वलोके ॥३२॥
य इच्छते धर्ममिमं महर्षिणां
दशो बलान् बुद्धबलानचिन्तियान्[10] ।
स शिक्षितु ईदृश[11] कायसंवरे
यः शिक्षितस्तस्य बला न दुर्लभाः[12] ॥३३॥

1 A रोषो
2 B drops स
3 B प्रकाशयतो
4 A ०सत्त्वान ; B ०सत्त्वोन
5 A यः शिक्षितो ईदृशि
6 A कम्पितु
7 C बुध्यतु
8 A चिन्तियान्येषु ; B अचिन्तियां येष ; C न चिन्तिया येस
9 B ईदृशि
10 A बलां बुद्धबलामचिन्तियां
11 A ईदृशि ; B ईदृशी
12 C ०स्तस्य न लाभ

ये चापि अष्टादश बुद्धधर्मा
आवेणिका येषु जिना प्रतिष्ठिताः[1] ।
ते चापि[2] तस्यो न भवन्ति दुर्लभा
यः शिक्षते ईदृश[3] कायसंवरे ॥३४॥

ये सप्त बोध्यङ्ग महा महर्षिणां
प्रतिसंविदश्चो तथ[4] ऋद्धिपादाः ।
ते चापि[2] तस्यो न भवन्ति दुर्लभा
यः शिक्षते ईदृश कायसंवरे ॥३५॥

ब्रह्माविहाराश्चतुरश्च ध्याना
विमोक्षद्वारास्त्रय संप्रकाशिताः ।
क्षेमा वितर्का अथ प्राविवेक्या[5]
न दुर्लभा भोन्ति स्थितस्य संवरे ॥३६॥

[करुणाविहारी तथुपेक्षलाभी
तथ ईर्यचर्यामिह मैत्रविराम् ।
हितु चिन्तु भोति च स सर्वजगे
यः कायसंवरि स्थितो भवति] ॥३७॥

स्मृती-उपस्थान प्रहाण सम्यक्
पञ्चेन्द्रियाः पञ्चबला महर्षिणाम् ।

1 C येसु जना प्रतिष्ठिता
2 C तेनापि
3 A ईदृशि ; B ईदृश
4 C तत्र
5 A & B प्राविवेक्का Tib. 245b, l. 7:
བདེ་བའི་རྣམ་རྟོག་རབ་ཏུ་དབེན་པ་ཡང་།

आर्य[1] आष्टाङ्गिकु मार्गश्रेष्ठो[2]
न दुर्लभो शिक्षितु[3] कायसंवरे ॥३८॥
ये चापि अन्ये वर बुद्धधर्मा
अचिन्तिया येष प्रमाणु नास्ति ।
ते तस्य सर्वे न भवन्ति दुर्लभा
यः शिक्षते ईदृश[4] कायसंवरे ॥३९॥
श्रुत्वा इहो ईदृश कायसंवरे[5]
विशेषप्राप्तो अभु राजपुत्रः[6]
तुष्टो उदग्रो अतुलीय प्रीतिया[7]
स प्रव्रजि तस्य जिनस्य शासने ॥४०॥
स प्रव्रजित्वा दश वर्षकोटी-
रचार्षि[8] शुद्धं वर ब्रह्मचर्यम् ।
भावेत्व ब्राह्मान्[9] चतुरो विहारा-
नर्थाय लोकस्य सदेवकस्य ॥४१॥
सुभाविता ब्रह्मविहार[10] कृत्वा
अद्राक्षि बुद्धान अशीतिकोटियः[11] ।

1 Mss. आश्चर्य आ०
2 A श्रेष्ठमार्गो ; B श्रेष्ठु मार्गो
3 A & B ०भो यः स्थितु
4 A ईदृशि
5 A & B श्रुत्वा इमं ईदृशु कायसंवर'
6 A & B राजकुञ्जरः
7 A अतुलीय प्रीतमानसः ; C ०प्रीतिये
8 A & B आचार्षि ; C रचार्षि
9 A ब्राह्मांश्च०
10 A सुभावितां ब्राह्म विहारु ; B अभावितां ब्राह्म विहार ; C स्वभाविता
11 A अद्राक्षु बुद्धान सहस्रकोटयः ; B अद्राक्षि बुद्धान सहस्रकोटियः

ततोत्तरे[1] यात्तिक गङ्गबालिका
इदं चरं सो वर ब्रह्मचर्यम्[2] ॥४२॥
सर्वेष चो शासनि प्रव्रजित्वा[3]
आचार्षि शुद्धं वर ब्रह्मचर्यम्।
भिक्षु अभूषी वर धर्मभाणको
बहुश्रुतश्चो[4] प्रतिभानवांश्च ॥४३॥
अखण्डशीलश्च अच्छिद्रशीलो
[विशुद्धशीलो] अकल्माषशीलः।
आर्ये च शीले स अनास्रवे स्थितः
प्रजानमानो इमु कायसंवरम्[5] ॥४४॥
सिया कुमारा तव अन्य सासीद्
विशेषचिन्ती तद राजकुञ्जरः।
न एव द्रष्टव्यमिहान्यु सोऽभू[6]-
[त्तदाहमासं[7]] चरमाणु चारिकाम् ॥४५॥
तस्मात् कुमारा मम शिक्षमाणाः
प्रतिष्ठिहेसी[8] इह कायसंवरे।

1 C तत्रोत्तरे
2 B ०चर्या
3 Tib. 246a, l. 7:
ཐམས་ཅད་ཀྱི་ཡང་བསྟན་པར་རང་བྱུང་སྟེ། །
4 B बहुश्रुत्व श्चो
5 B संवरे
6 A अन्यु साभूद्; B अन्य सोभूद्
7 B drops तदाहमासं
8 C प्रतिष्ठपेसी

अन्येष चो देशय प्राण[1]कोटिनां
न चिरेण त्वं भेष्यसि यादृशोऽहम्[2] ॥४६॥

[3]तस्मात्तर्हि कुमार परिशुद्धकायसमाचारो[4] भविष्यामीत्येवं त्वया[5] कुमार[6] शिक्षितव्यम्। तत् कस्य हेतोः। परिशुद्धकायसमाचारो[4] हि कुमार बोधिसत्त्वो महासत्त्वो न निरयेभ्यो बिभेति। न तिर्यग्योनेर्न यमलोकान्न सर्वदुर्गतिभ्यो बिभेति। नोदकाद् बिभेति[7]। न शस्त्रतो न सिंहेभ्यो[8] न व्याघ्रेभ्यो न ऋक्षेभ्यो[9] न हस्तिभ्यो नर्षभेभ्यो न मनुष्येभ्यो बिभेति। परिशुद्धकायसमाचारः कुमार[10] बोधिसत्त्वो महासत्त्वः इममपि त्रिसाहस्रं महासाहस्रं लोकधातुं करतले कृत्वा तालमात्रं द्वितालमात्रं त्रितालमात्रं [11]चतुस्तालमात्रं पञ्चतालमात्रं षट्तालमात्रं सप्ततालमात्रमुत्क्षिपेद् यावन्तं वा पुनराकांक्षेत्तावन्तमेवोत्क्षिपेत्[12]।

1 A अन्येष चोदेमु प्राणि॰ ; B अनेष चो देशय प्राणिं ; C अन्ये च सो देशयि
2 B adds here श्रीसमाधिराजे कायसंवरे परिवर्त अष्टत्रिंशतितमः। This does not appear in A, C & Tib.
3 A & B add तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म।
4 A & B ॰कायसमुदाचारो
5 A drops त्वया
6 B adds सदा
7 A & B add नाग्नितो बिभेति न विषतो
8 C न हिंस्रेभ्यो
9 C रिक्षेभ्यो
10 A स खलु पुनः कुमार ; B समुदाचारः खलु पुनः कुमार
11 A चतुष्कताल॰
12 A यावत्तं पुनराकाक्षंस्तावतमेवो॰ ; B ॰मुत्क्षिप्येद् यावत्तु वा पुनराकांक्षेत्तावन्तमेवाक्षिपेत

[पुनरपरं] परिशुद्धकायसमाचारः कुमार बोधिसत्त्वो महासत्त्व ऋद्धिप्रातिहार्ये परमपारमिप्राप्तो[1] भवति। स ऋद्धि[पादवि]पाकविशुद्धः पुण्यपरिगृहीतो विवेकविविक्तः सर्वत्रानुगतः। एतत् समाधिप्रतिलब्धः अनास्रवपुण्यपरिनिष्पन्नः। सर्वलोकधाताव[2]प्रतिहतचक्षुः। एवंरूपैः ऋद्धिप्रातिहार्यैः समन्वागतो भवति। तत्र कतमा ऋद्धिः। यया ऋद्ध्या प्रार्थनासमृद्धि[3]परिनिष्पत्तिरियमुच्यते ऋद्धिरिति। तत्र कतमद् ऋद्धिप्रातिहार्यम्। यया[4] ऋद्ध्या समन्वागतो बोधिसत्त्वो महासत्त्वः अनेकविधानृद्धिविषयान् प्रत्यनुभवति। एकोऽपि भूत्वा बहुधा भवति बहुधापि भूत्वैको भवति। आविर्भावं तिरोभावमपि प्रत्यनुभवति। तिरःकुड्यं तिरः-[प्राकारं तिरः]पर्वतमप्यसज्जमानो गच्छति। आकाशेऽपि क्रमते तद्यथापि नाम[5] पक्षी शकुनिः। पृथिव्यामप्युन्म[ज्जन-निम]ज्जनं करोति तद् यथापि नामोदके। [उदकेऽ]प्यभिद्यमानो [गच्छति] तद् यथापि नाम पृथिव्याम्[6]। धूमायत्यपि प्र[ज्वल]त्यपि तद् यथापि नाम महानग्निस्कन्धः। [7]इमावपि

1 A & B ऋद्धिप्रातिहार्यै परमपारमिताप्राप्तो ; C ऋद्धिमाप्नोति हार्ये परम०

2 A & C ०लोकधात्वप्र०

3 A ०द्धिर्यदुत यायर्ध्यता प्रार्थनासमृद्धिः ; B तत्र कतमा ऋद्धिप्रतिहार्याणि ऋध्यभिना प्रार्थनासमृद्धिः

4 B या

5 B drops नाम

6 B महापृथिव्यां

7 A, B & Tib, add स्वकायादप्यनेकानि महावारिधारा उत्सृजति तद् यथापि नाम महामेघो याभिर्वारिधाराभिरयं त्रिसहस्रमहासाहस्रलोकधातुरादीप्तः संप्रज्वलितः अग्निना प्रतिज्वालीभूतो निर्वाप्यते।

आसन्न[1] सो जानति ब्रह्मलोकं
ब्रह्माण कोटीन[2] स धर्म देशयी ॥४९॥
यदा च आकांक्षति धर्म भाषितु[3]
महात्रिसाहस्र[4] स विज्ञपेति ।
आकांक्षमाणो बहुक्षेत्रकोटिषु
देशेति धर्मं बहु[5]सत्त्वकोटिनाम् ॥५०॥

[6]तस्मात्तर्हि कुमार परिशुद्धकायसमुदाचारो[7] भविष्यामीत्येवं त्वया कु[मा]र शिक्षितव्यम्[8]। तत् कस्य हेतोः। परिशुद्धकायसमुदाचारो हि कुमार बोधिसत्त्वो महासत्त्वो दिव्येन श्रोत्रधातुनातिक्रान्तमानुषकेण शब्दान् शृणोति दिव्यान्मानुष्यकांश्च। नैरयिकानामपि तिर्यग्योनिगतानामपि। यामलौकिकानामपि। ये दूरे अन्तिके वा। देवानां च मनुष्याणां वा दूरावचराणां वा अन्तिकावचराणां वा[9]।

1 C आसान्नि
2 A सर्वेष लोकान
3 B देशितुः
4 A ०साहस्रि
5 A & B ०प्राणि०
6 A adds तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म।
7 C ०कायसमाचारो
8 B सदा शिक्षित०

9 A & B omit the words from देवानां to अन्तिकावचराणां वा। and add पुनरपरं कुमार परिशुद्धकायसमुदाचारो भविष्यामीत्येवं त्वया कुमार शिक्षितव्यम्। तत् कस्य हेतोः। परिशुद्धकायसमुदाचारो हि बोधिसत्त्वो महासत्त्व आसन्ननिषण्णो दिव्येन घ्राणेन्द्रियेण यावन्तस्त्रिसाहस्रे लोकधातौ दिव्यमनोज्ञधर्मगन्धस्तान् सर्वान् घ्रायति ये दूरे अन्तिके वा। तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म।
तस्मात्तर्हि कुमार etc.

तस्मात्तर्हि कुमार परिशुद्धकायसमुदाचारो भविष्यामीत्येवं त्वया कुमार शिक्षितव्यम्। [तत् कस्य हेतोः।] परिशुद्धकायसमुदाचारो हि कुमार बोधिसत्त्वो महासत्त्वः परसत्त्वानां परपुद्गलानां चेतसैव चेतःपरिवितर्क[1]चरितानि यथाभूतं प्रजानाति। सरागं चित्तं सरागं चित्तमिति यथाभूतं प्रजानाति। वीतरागं चित्तं वीतरागं चित्तमिति यथाभूतं प्रजानाति। पेयालं। सदोषं[2] वीतदोषं समोहं वीतमोहं[3] सोपादानमनुपादानं[4] संक्षिप्तं विक्षिप्तं विपरीत[मविपरीतं] संक्लेशं निष्क्लेशं महद्गतममहद्गतं प्रभास्वरमप्रभास्वरं सप्रमाणमप्रमाणं सोत्तरमनुत्तरं समाहितमसमाहितं विमुक्तमविमुक्तं साङ्गणं चित्तं साङ्गणं चित्तमिति यथाभूतं प्रजानाति। अनङ्गणं चित्तमनङ्गणं चित्तमिति यथाभूतं प्रजानाति।[5] इति हि सर्वसत्त्वानां परपुद्गलानां चेतसैव चेतःपरिवितर्कं[6] यथाभूतं प्रजानाति[7]।

परिशुद्धकायसमुदाचारः कुमार बोधिसत्त्वो महासत्त्वः साकारं सोद्देशमनेकविधं पूर्वेनिवासमनुस्मरति। एकामपि जातिमनुस्मरति। द्वे [तिस्रः] चतस्रः पञ्च दश विंशतिः त्रिंशत् चत्वारिंशत् पञ्चाशत् जातिशतमप्यनुस्मरति। जाति-

1 A & B परिवितर्काणि ; C परिचितक०
2 A & B सदोषचित्तं वीतदोषचित्तं
3 A & B add सतृष्णं वीततृष्णं
4 A & B वीतोपादानं
5 Cf. Majjhima Nikāya, 1, pp. 34, 59, 69, 495; Dīgha Nikāya, 1, p. 80.
6 C परिचित्तकं
7 A & B drop the words from इति हि to प्रजानाति

सहस्रमप्यनुस्मरति। जाति[शत]सहस्रमपि यावदनेकान्यपि कल्पकोटिनयुतशतसहस्राण्यनुस्मरति। संवर्तकल्पमप्यनुस्मरति। विवर्तकल्पमपि यावदनेकानपि संवर्तविवर्तकल्पाननुस्मरति। कल्पमप्यनुस्मरति कल्पशतमपि कल्पसहस्रमपि कल्पशतसहस्रमपि यावदनेकान्यपि कल्पकोटीनयुतशतसहस्राण्यनुस्मरति। यावत् पूर्वान्तकोटीमप्यनुस्मरति। अमुत्राहमासमेवंनामा एवंगोत्र एवंजात्य एवंवर्ण एवमाहार एवमाजीव एवमायुष्प्रमाण एवंचिरस्थितिक एवंसुख[दुःख]प्रतिसंवेदी। ततश्च्युतः अमुत्रोपपन्नः। [सोऽहं] ततश्च्युत इहास्म्युपपन्न इति। साकारं सनिमित्तं सोद्देशमनेकविधं पूर्वेनिवासमनुस्मरति[1]।

परिशुद्धकायसमुदाचारः कुमार बोधिसत्त्वो महासत्त्वो दिव्येन चक्षुषा विशुद्धेनातिक्रान्तमानुषकेण सर्वान् पश्यति च्यवमानानुपपद्यमानान् सुवर्णान् दुर्वर्णान् सुगतान् दुर्गतान् हीनान् प्रणीतान् सुगतिमपि गच्छतो दुर्गतिमपि गच्छतो यथाकर्मोपगान् सत्त्वान् यथाभूतं प्रजानाति। इमे वत[2] सत्त्वा कायदुश्चरितेन समन्वागता वाग्दुश्चरितेन समन्वागता मनोदुश्चरितेन समन्वागता आर्याणामपवादका मिथ्यादृष्टिका मिथ्यादृष्टिकर्मसमादानहेतोः कायस्य भेदात् परं मरणादपायं दुर्गतिं विनिपातं निरयेषु उपपन्नाः। इमे पुनर्वत[2] सत्त्वाः कायसुचरितेन समन्वागता वाक्सुचरितेन समन्वागता मनःसुचरितेन समन्वागता आर्याणा-

1 Cf. Majjhima Nikāya, I, p. 34 etc.

2 Mss. भवन्तः; also in पञ्चविंशतिसाहस्रिका-प्रज्ञापारमिता, p. 87 but in Pali it is always वत।

मनपवादका: सम्यग्दृष्टिकर्मसमादानहेतोः कायस्य भेदात् परं मरणात् सुगतौ स्वर्गलोके देवेषूपपन्नाः। इति हि[1]

1 Ms. A replaces the subsequent portion from इति हि to p. 613, st. 10 by the following extract: सम्यग्दृष्टिसमादानहेतोस्तद्धेतुं तत्प्रत्ययं कायस्य भेदात् परं मरणात् सुगतौ स्वर्गलोके देवलोकेषूपपद्यन्ते। इत्येवं परिशुद्धकायसमुदाचार-बोधिसत्त्वो महासत्त्वोऽनेकप्रकारसुगतिदुर्गतिसमुत्पन्नसमाचारान् पश्यति।

अथ खलु भगवांस्तस्यां वेलायामिमां गाथामभाषत।

यो बोधिसत्त्वः परिशुद्धकायः
श्रृणोति [शब्दान् दूरे वान्तिके वा]।
देवान शब्दान् मनुजान शब्दान्
दैत्यान नागान तथ किन्नराणाम् ॥१॥

भूतान प्रेतान तथ गारुडानां
तिर्यग्गतानां तथ नारकाणाम्।
लोकान्तरीकेष्वपि ये च शब्दा-
स्तान् बोधिसत्त्वः सततं श्रृणोति ॥२॥


यो बोधिसत्त्वः परिशुद्धकायः
[गन्धान घ्रायति स] एव सर्वान्।
घ्राणेन्द्रियेणैव च दैवतेन
यावन्त एवं सुमनोज्ञगन्धाः ॥३॥

देवान गन्धा मनुजान गन्धा-
स्तिर्यग्गतानां तथ नारकाणाम्।
सर्वत्रिसाहस्रिक-लोकधातौ
तान् सर्वगन्धान् स विदु प्रघ्रायति ॥४॥

यो बोधिसत्त्वः परिशुद्धकायः
स शुद्धज्ञानी परचित्तवेदी।
सरागचित्तं खलु वीतरागं
जानाति सर्वं परचित्ततर्कम् ॥५॥

सदोषचित्तं किल वीतदोषं
समोहनिर्मोहं वितर्कितं च।
सतृष्णचित्तं परिवीततृष्णां
जानाति सर्वं तनुसंवरस्थः ॥६॥

[Vide pp. 614-616]



[Vide pp. 610-613]

दिव्येन चक्षुषा विशुद्धेनातिक्रान्तमानुषकेण सत्त्वान् पश्यति च्यवमानानुपपद्यमानान् सुवर्णान् दुर्वर्णान् हीनान् प्रणीतान् सुगतिमपि गच्छतो दुर्गतिमपि गच्छतो यथाकर्मोपगान् सत्त्वान् यथाभूतं प्रजानाति ।

सोद्ग्राहिचित्तं निरुपाग्रहीकं
संक्षिप्तविक्षिप्तकमानसत्वम् ।
परीत्तचित्तमपरीत्तचित्तं
जानाति भूतं तनुसंवरस्थः ॥७॥

महद्गतं वाप्यमहद्गतं च
प्रभास्वरं नैव प्रभास्वरं वा ।
प्रमाणभूतं परिविप्रमाणं
जानाति सर्वं परिशुद्धदेहः ॥८॥

समाहितं चाप्यसमाहितं च
निरुत्तरं सोत्तरमेव चित्तम् ।
विमुक्तकं चाप्यविमुक्तकं वा
जानाति सर्वं यथभूतमेव ॥९॥

अनंगणं चैव हि सांगणं चा
ससंगिकं वापि निसंगिकं च ।
परैर्यथा तर्कितमेव सर्वं
जानाति कायोत्तमसंवरस्थः ॥१०॥

यो बोधिसत्त्वस्तनुसंवरस्थो
नानाविधं पूर्वनिवासजातिम् ।
सोद्देश साकारमनेकरूपं
सोऽनुस्मरन् भोति च जातिवेत्ता ॥११॥

यः सत्त्वकायोत्तमसंवरस्थः
स दिव्यचक्षुर्लभते विशुद्धम् ।
तेनैव नेत्रेण सुनिर्मलेन
संपश्यते लौकिक सर्व वृत्तिम् ॥१२॥

परिशुद्धकायसमुदाचारः कुमार बोधिसत्त्वो महासत्त्वः एकक्षणसमायुक्तया प्रज्ञया यत् किंचिज् ज्ञातव्य[1]मधिमोक्तव्यं विकुर्वितव्यं तत्सर्वं यथाभूतं प्रजानाति शृणोति पश्यते बुध्यते ।

ये लोकधातौ विचरन्ति लोकाः
केचिच्च्युता येऽप्युपपद्यमानाः ।
हीनाः प्रणीताः खलु मध्यमा ये
केचित् सुवर्णाः खलु ये विवर्णाः ॥१३॥

सद्धर्मचर्या विचरन्ति केचि-
द्धर्मार्थकामान् परिसेवमानाः ।
श्रद्धान्विता ये शुभपुण्यकामाः
संपश्यते तान् परिशुद्धकायान् ॥१४॥

अधर्मचर्यासु चरन्ति केचि-
दश्रद्दधानाः शुभवर्णवृत्तौ ।
आर्यापवादाशुभकर्मरक्ताः
संबोधिज्ञानं नभिवन्द्यमानाः ॥१५॥

केचित् पतन्ति नरकेषु तिर्यग्-
योनौ च प्रेतेषुपयन्ति दुःखम् ।
तांश्चैवमेवं सकलांश्च लोकान्
संपश्यते कायिकसंवरस्थः ॥१६॥

स प्राणिनो हन्ति न चैव जातु
नासंप्रदत्तं [च] समाददाति ।
न चैव मिथ्याभिरतिं स भुङ्क्ते
यः शिक्षते प्रोत्तमकायसंवरे ॥१७॥

तस्मात् कुमार प्रतिशुद्धदेहं
शुभेषु धर्मेषु चरध्वमेवम् ।
यथा चरन्तो न चिरेण बोधिं
प्राप्स्यन्ति धर्मानुपदेशयन्तः ॥१८॥

इति श्रीसमाधिराजे कायसंवरपरिवर्तो नामाष्टत्रिंशतिमः ।

1 A, B & Tib. 250b, l. 1 : ज्ञातव्यं द्रष्टव्यं श्रोतव्यं बोधिमभिसंबोद्धव्यं विकुर्वितव्यं

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ।

अभिज्ञाक्रमनिर्दिष्टो[1] बोधिसत्त्वान तायिनाम् ।
समाधीय स्थिहित्वान बोधिसत्त्वोऽधिगच्छति[2] ॥५१॥
श्रोत्रं च ते विशोधेन्ति दिव्यं श्रोत्रमचिन्तियम् ।
येन शृण्वन्ति ते धर्मान् सर्वबुद्धेहि भाषितान्[3] ॥५२॥
सरागमसरागं वा सदोषं वीतदोषकम् ।
समोहं वीतमोहं वा चित्तं जानन्ति प्राणिनाम्[4] ॥५३॥
पूर्वेनिवासं जानन्ति[5] यत्र ते उषिताः पुरा ।
कल्पकोटीसहस्राणि सङ्ख्स्तेषां न विद्यते ॥५४॥
चक्षुश्च [ते] विशोधेन्ति दिव्यं चक्षुरनुत्तरम् ।
[अनु]पश्यन्ति ते[6] सत्त्वांश्च्यवतोऽ[प्यु]पपद्यतः ॥५५॥
एकक्षणसमायुक्त[7]प्रज्ञया सर्वजातिषु ।
यत् किञ्चिदिह ज्ञातव्यं धर्माणां भूतलक्षणम् ॥५६॥

[तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म]। तस्मात्तर्हि कुमार वाक्संवरसंवृतो भविष्यामीत्येवं बोधिसत्त्वेन महासत्त्वेन शिक्षितव्यम्[8] । तत्र कुमार कतमो वाक्संवरः । येन वाक्संवरेण समन्वागतो बोधिसत्त्वो महासत्त्वः

1 B ०क्रमु निद्दष्टो
2 B ०ति बुद्धति
3 B ता धर्मा सर्वबुद्धेहि देशितान् and then adds
महात्रिसाहस्त्रिय लोकधातौ ये गन्ध दिव्या धर्म सन्ति सर्वो ।
दिव्येन घ्राणेन यथा निषण्णो तां घ्रायते सो विदु बोधिसत्त्वो ॥
4 B चित्त जानाति प्राणिनाः
5 B जानाति ; Tib. प्रजानाति
6 B पश्यति ता ; C ये पश्यन्ति
7 B युक्तयाः
8 A & B ०ष्यामीत्येवं त्वया कुमार [सदा B] शिक्षितव्यम् ।

षष्ट्याकारसमन्वागतमसंगबुद्धस्वरघोषमचिन्त्यं प्रतिलभते[1]। अयमुच्यते [कुमार] वाक्संवरः। येन वाक्संवरेण समन्वागतो बोधिसत्त्वो महासत्त्वः आदेयवाक्यतां प्र०[2]। अयमुच्यते[3]....वा०। येन....महासत्त्वः द्वात्रिंशन्महापुरुषलक्षणानि प्र०।[4] दश तथागतबलानि चत्वारि तथागतवैशारद्यानि अष्टादशावेणिकान् बुद्धधर्मान् प्र०। अयमुच्यते....वा०। येन....महासत्त्वस्त्रीणि विमोक्षमुखानि प्र०। चतुरो ब्रह्मविहारान् प्रतिलभते। अयमुच्यते ....वा०। येन....महासत्त्वश्चत्वारि स्मृत्युपस्थानानि प्रतिलभते[5]। चत्वारि सम्यक्प्रहाणानि चतुर ऋद्धिपादान् पञ्चेन्द्रियाणि पञ्च बलानि सप्त बोध्यङ्गानि आर्याष्टाङ्गं मार्गं प्र०। अयमुच्यते ...वा०। येन....महासत्त्वो[6] महाकरुणाविहारं प्र०। महोपेक्षाविहारं प्र०। क्षेमांश्च वितर्कान् प्र०। प्रविवेकांश्च वितर्कान् प्र०। अयमुच्यते कुमार वाक्-संवर [इति]।

पुनरपरं कुमार वाक्संवर उच्यते ये[न] वाक्संवरेण समन्वागतो बोधिसत्त्वो[7] महासत्त्वो मृषावादात् प्रतिविरतो भवति। पशुन्यात् पारुष्यात् संभिन्नप्रलापात् प्रतिविरतो भवति। मातापितृणामाचार्याणां चान्तिके असत्यां[8]

1 A सर्वसंसारिकधर्मेष्वसंगज्ञानतां प्रतिलभते ; C सष्टीकारसमन्वागत०

2 प्र० = प्रतिलभते

3 अयमुच्यते...वा०। येन...महासत्त्वः = अयमुच्यते कुमार वाक्संवरः। येन वाक्संवरेण समन्वागतो बोधिसत्त्वो महासत्त्वः

4 B & Tib. 251a, l. 7 add ०सत्त्वः अशीत्यनुव्यञ्जनानि प्रतिलभते

5 A & Tib. add चतस्रः प्रतिसंविद्

6 B adds महामुदिताविहारं प्रतिलभते

7 Tib 252a, l. 6 adds प्राणातिपातात्

8 Mss. असभ्यां but not in Tib.

वाचं [न] निश्चारयति। या अपि तदन्या दोषोपसंहिता वाचस्ताभ्यो बोधिसत्त्वः प्रतिविरतो भवति। ताश्च वाचः प्रतिश्रुत्कोपमा अवतरति। स्वप्नोपमा निर्मितोपमा मरीच्युपमाः प्रतिश्रुत्कोपमाः प्रतिभासोपमा मायोपमा अवतरति। स तामेवंभूतां वाचं नोपलभते न कल्पयति न मन्यते नावलम्बते नाभिनिविशते। अयमुच्यते [कुमार] वाक्संवरः। परिशुद्धवाक्संवरो[1] हि कुमार बोधिसत्त्वो महासत्त्वः सर्वापायेभ्यो न बिभेति सर्वबुद्धधर्मान्[2] प्रतिलभते। सर्वबुद्धर्द्धिं सर्वाभिज्ञां प्रतिलभते।

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत।

येनेह वाक्संवरणेनुपेतो
लभत्यवश्यं स हि बोधिसत्त्वः।
सर्वेषु धर्मेषु असंगज्ञान-
मयं हि सो[3] उच्यति वाचसंवरः[4] ॥५७॥

येनेह वाक्संवरणेन धीरा
लभन्ति द्वात्रिंशति[5] लक्षणानि।
दशो बलावेणिक-बुद्धधर्मा-
नयं हि सो उच्यति वाचसंवरः ॥५८॥

1 B ०द्धकायसमुदाचारो हि

2 A drops from परि० to धर्मान्

3 B सो च्यति वाक्०

4 A, B & Tib. 252b, l. 7 add

येनेह वाक् संवरणेन धीमाल्लभते षष्ठांगसमानयुक्तम्।
असंगस्वरमचिन्त्यघोषमयं हि सो उच्यति वाचसंवरः॥

5 B धीमान् लभेत द्वात्रिंशते लक्षणानि।

येनेह वाक्संवरणेन धीमान्
प्राप्नोति सर्वानिम[1] बुद्धधर्मान् ।
ये पूर्वमस्मिन् परिकीर्तिता मे
अयं हि सो उच्यति[2] वाचसंवरः ॥५९॥

येनेह वाचावरणेन[3] धीमान्
लभेद्विहारान् प्रतिसंविदश्च ।
अत्यद्भुतान् धर्म अचिन्तियांश्च[4]
अयं हि सो उच्यति[5] वाचसंवरः ॥६०॥

येनेह वाचावरणेन[3] धीमान्
स्मृत्युपस्थानानि सम्यक्प्रहाणा[6] ।
तथर्द्धिपादान् [7]बल इन्द्रियाणि
लभत्ययं सोच्यति[8] वाचसंवरः[9] ॥६१॥

येनेह वाक्संवरणेन धीमान्[10]
महा उपेक्षां लभते[11] विशारदः ।
महाकृपा शुद्धविहारतां च
अयं हि सो उच्यति वाचसंवरः ॥६२॥

1 A धीमानाप्नोति हि सर्वानिह ; B धीमान् आप्नोति सर्वानिह बुद्धधर्मान् ; C प्राप्नोति सत्त्वानिम
2 A सो वुच्चति ; B drops this line.
3 A, B & Tib. वाक्संवरणेन
4 A अत्यद्भुतं धर्म अचिन्तियं च
5 A सो वुच्चति
6 A & B स्मृती उपस्थान प्रहाणसम्यक्
7 B तथ ऋद्धिपादान् बलइन्द्रियानि C ते अथर्द्धि पादान् बल इन्द्रियाणां
8 A सोच्चति ; B स उच्चति
9 B वाक्यसम्बरः
10 A ०वरेण समन्वागतो बोधिसत्त्वो
11 A लभतो ; B महानुपेक्षानुलभते

येनेह वाक्संवरणेन धीमान्
क्षेमान्[1] वितर्काल्लँभते विशुद्धान् ।
तथा वितर्कान् प्रविवेकशान्ता-
नयं हि सो[2] उच्यति वाचसंवरः ॥६३॥

येनेह वाक्सं[व]रणेन धीमान्
मृषा[3] न भाषी पिशुनाश्च वाचः[4] ।
संभिन्नप्रलापं परुषां च वाचम्[5]
अयं खु सो उच्यति[6] वाचसंवरः[7] ॥६४॥

येनेह वाक्संवरणेन धीमान्
सद्धर्मक्षेपं[8] न करोति जातु
न बुद्धसंघं च अभ्याचक्षेत[9]
अयं खु सो उच्यति[6] वाचसंवरः ॥६५॥

येनेह वाक्संवरणेन धीमान्
मातापितृष्वाचरियानमन्तिके[10] ।
असत्यवाचं पुरतो न भाषी[11]
अयं खु सो उच्यति[6] वाचसंवरः[7] ॥६६॥

1 A क्षेमान् वितर्कान् प्रविवेक शान्तं । मैत्रीविहारं लभते सुराणि अयं
2 B अयं खु सौ
3 A & B मृषां
4 A °षी परुषां च वाचं ; C °षी पिशुनाच वाचा
5 A संभिन्नवाच पिशुनां च वाणीं ; B परुषश्च वाणीम्
6 A वुचति
7 B वाक्यसम्बरः
8 B क्षेपां ; C क्षेमं
9 A न बुद्धसंघ च प्रतिक्षिपेत ; B न बुद्धधर्मसंघश्च प्रतिक्षिपेती ; C नबुद्धधर्मं
10 A & B चान्तिके
12 A & B भाषते

येनेह वाक्संवरणेन धीमान्
या[1] अन्यवाचो इह दोषसंहिताः ।
ताभ्योऽप्यशेषं विरतः स भोति
अयं खु सो उच्यति वाचसंवरः ॥६७॥

येनेह वाक्संवरणेन धीमान्
प्रतिश्रुत्क[2]-सन्निभतां पि[3] वाचम् ।
सुपिनोपमामोत्तरतो[4] विशारदो
अयं खु सो उच्यति वाचसंवरः ॥६८॥

निरात्म-निर्जीव-निरीहतां वा[5]
प्रतीत्युत्पन्नां[6] सुपिनोपमां मृषा[7] ।
यदेव वाचोत्तरि बोधिसत्त्वो
अयं खु सो उच्यति वाचसंवरः ॥६९॥

निरोध नित्य[8] सुपिनं यथैव[9]
स्वप्नस्वभावा[10] अथ निर्वृतिं[11] च ।
यदेव[12] वाचोत्तरि बोधिसत्त्वो
अयं खु[13] सो उच्यति वाचसंवरः[14] ॥७०॥

1 A drops from या अन्य to धीमान्
2 A प्रतिश्रुत्वता सन्निभतां च ; C प्रतिश्रुतकां 3 B च वाचः
4 A & B सुपिनोपमा सो भवती 5 A & B ०हताश्च वा
6 B प्रत्युतपन्नां 7 B मृषां 8 B & C सत्य
9 A तथैव 10 A स्वभावथ
11 B निर्वृतिश्च 12 A & B येनेह ; C येनैव
13 B अयं हि 14 C बोधिसत्त्व वाचसम्बरः

नो चापि[1] वाचं लभते स कांचि-
न्न कल्पयी नापि च मन्यते सः[2] ।
नालम्बते नाभिनिवेश[3] जातू
अयं खु सो उच्यति वाचसंवरः[4] ॥७१॥

[तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म ।] तस्मात्तर्हि कुमार मनःसंवरसंवृतो भविष्यामीत्येवं बोधिसत्त्वेन महासत्त्वेन शिक्षितव्यम् । तत्र कुमार कतमो मनःसंवरः । येन मनःसंवरेण समन्वागतो बोधिसत्त्वो महासत्त्वो वज्रोपमं समाधिं प्रतिलभते । अयमुच्यते [कुमार] मनःसंवरः । येन मनःसंवरेण समन्वागतो बोधिसत्त्वो महासत्त्वो ज्वलनान्तराभां[5] नाम रश्मिं प्रतिलभते । अयमुच्यते मनःसंवरः । येन[6]··· महासत्त्वोऽष्टाङ्गोपेतस्वरघोषसंपदं प्र०[7] । अयमुच्यते मनःसंवरः । येन···महासत्त्वो द्वात्रिंशन्महापुरुषलक्षणानि प्र० । दशतथागतबलानि चत्वारि वैशारद्यानि चतस्रः प्रतिसंविदः अष्टादशावेणिकांश्च बुद्धधर्मान् प्र० । अयमुच्यते मनःसंवरः । येन··· महासत्त्वः त्रीणि विमोक्षमुखानि प्र० । शून्यतामनिमित्तमप्रणिहितं विमोक्षमुखं प्र० । अयमुच्यते मनःसंवरः । येन···महासत्त्वश्चतुरो ब्रह्मविहारान् प्र० । महामैत्रीं महाकरुणां महामुदितां

1 A वापि 2 A ०ते सौ ; B च न सो सौ 3 A निवेखु

4 A & B add इति श्रीसमाधिराजे वाक्संवरपरिवर्तो नामोनचत्वारिंशतितमः ।

5 A ज्ञानोत्तरङ्ग

6 येन...महासत्त्वः=येन मनःसंवरेण समन्वागतो बोधिसत्त्वो महासत्त्वः

7 प्र०=प्रतिलभते

महोपेक्षां प्र० । अयमुच्यते मनःसंवरः। येन...महासत्त्वश्चत्वारि स्मृत्युपस्थानानि प्र० । चत्वारि सम्यक् प्रहाणानि चतुर ऋद्धिपादान् पञ्चेन्द्रियाणि पञ्च बलानि सप्त बोध्यङ्गानि आर्याष्टाङ्गं मार्गं प्र० । अयमुच्यते मनःसंवरः। येन...महासत्त्वो महाकरुणाविहारं प्र० । महोपेक्षाविहारं प्र०[1] । क्षेमांश्च वितर्कान् प्र० । [प्रविवेकांश्च वितर्कान् प्र०] हितैषितां च ईर्यां च चर्यां च प्र० । अयमुच्यते मनःसंवरः ।

पुनरपरं कुमार मनःसंवर उच्यते। येन मनःसंवरेण समन्वागतो बोधिसत्त्वो महासत्त्वो मिथ्यादृष्टिप्रहाणाय मिथ्यादृष्ट्या सार्धं न संवसति। अभिध्याप्रहाणाय अनभिध्यालुर्भवति। व्यापादप्रहाणाय व्यापादेन सार्धं न संवसति। कौसीद्यप्रहाणाय कुसीदेन सार्धं न संवसति। गुरूणामन्तिके मातापित्रोराचार्याणां चान्तिके शाठ्यचित्तं नोत्पादयति। रागद्वेषमोहचित्तं नोत्पादयति। न च तैः सार्धं संवसति। बोधिचित्तं नोत्सृजति। अध्याशयचित्तं च नोत्सृजति। ये चान्ये दोषोपसंहिता मनःसंकल्पास्तेभ्यः सर्वेभ्यः प्रतिविरतो भवति। न च तैः सार्धं संवसति। अयमुच्यते मनःसंवरः। तच्च मनो मायोपममित्यवतरति। स्वप्नोपममपि मरीच्युपममपि निर्मितोपममिति प्रतिभासोपममित्यवतरति। न कुतश्चिदागमनतोऽवतरति। स्वप्नोपमं सुख-

1 B महामैत्रीविहारं प्रतिलभते। महाकरुणाविहारं प्र० । महामुदिताविहारं प्र० । महोपेक्षाविहारं प्र० । क्षेमांश्च वितर्कान् प्र० । प्रविवेकांश्च वितर्कान् प्र० । अयमुच्यते कुमार मनःसंवरः। येन मनःसंवरेण समन्वागतो बोधिसत्त्वो महासत्त्वः हितैषितां etc.

मवतरति। स्वप्नोपममनित्यतोऽवतरति। स्वप्नोपमं निर्जीवतोऽवतरति। स्वप्नोपमं शून्यतोऽवतरति। तच्च नोपलभते न कल्पयति न मन्यते ना[व]ल[म्बते नाभिनिवि]शते। अयमुच्यते, कुमार मनःसंवरः।

[1]परिशुद्धमनःसमुदाचारो[2] हि कुमार बोधिसत्त्वो महासत्त्वः सर्वक्षणांश्च[3] वर्जयति। अचिन्त्यांश्च सर्वबुद्धधर्मान् प्रतिलभते। [सर्वबुद्धेभ्यश्च] [4]सर्वबुद्धाभिज्ञां अकोप्यां च चेतोविमुक्तिं प्रतिलभते। अयमुच्यते मनःसंवरः।

अथ[5] खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत।

श्रृणोथ[6] सर्वि[7] अविक्षिप्तमना
मम भाषतो[8] मनःसंवरणम्।
श्रुत्वा च तत्र प्रतिपद्यथा मे[9]
यदीच्छथा लघु विशोधनताम्[10] ॥७२॥
मनःसंवरेण लभि[11] येन विदु
परमप्रशान्त विपुलानचलान्।

1 A & B add तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतनामन्त्रयते स्य। तस्मात्तुह कुमार मनःसमुदाचारो भविष्यामीत्येवं कुमार त्वया शिक्षितव्यं। तत्र कस्य हेतोः।
2 C मन समाचार
3 A & B सर्वालक्षणान् विवर्ज०
4 B drops सर्व०
5 B तत्र
6 C निश्रृणोथ
7 A drops सर्वि
8 A भाषते मनस सम्वर ; B मन भाषितो
9 B श्रुत्वा च तस्य प्रतिपद्यथ मे ; C प्रतिपद्य
10 A यदिच्छेत स्यानु लघुविबोधनतां ; B यदिच्छ स्वस्त्यलघु
11 A मनसम्बरेण लघु येन

जिनधर्म चिन्तिय तथाद्भुततां[1]

मनःसंवरुच्यति विशुद्ध अयम् ॥७३॥

मनःसंवरेण लभि येन[2] विदु

चेतोविमुक्तिमचलां सततम् ।

वज्रोपमं[3] तथ समाधिवरं

मनःसंवरूच्यति हि श्रेष्ठ अयम् ॥७४॥

निष्पादयत्यपि च येन विदु

उपचाररश्मिं[4] विपुलार्थकरीम् ।

आर्याष्टांगुपेतस्वर[5] येन लभी

मनःसंवरूच्यति विशुद्ध अयम् ॥७५॥

मनःसंवरेण विदु[6] येन वरां

द्वात्रिंशलक्षण[7] लघू लभते ।

दश चो[8]बलान्यखिलबुद्धगुणान्

मनःसंवरः कथितु श्रेष्ठ अयम् ॥७६॥

मनःसंवरेण लभि येन विदु

प्रतिसंविदस्तथ विशारदताम्[9] ।

1 B ०ता

2 A लभि ये ; B ०णा भि न येन

3 A ०पम ; B ०पमां

4 C ०पचार०

5 A षष्ठंगुपेत स्वरु ; B दृष्टागुपेतस्वरु ; see above, p. 619.

6 B मनसम्वरेणापि

7 B ०लक्षणाश्च

8 B दशवचो

9 C ०रदता ; B प्रतिसंविदं तथा विशारतां

परमाद्भुतान्[1] गुण अचिन्त्य तथा
मनःसंवरः कथितु श्रेष्ठु अयम् ॥७७॥
मनः[सं]वरेण लभि येन विदु[2]
स्मृत्युपस्थान चतु[3] ऋद्धिपादान् ।
सम्यक् प्रहाण बल इन्द्रिय[4] चो
मनःसंवरः कथितु श्रेष्ठ अयम्[5] ॥७८॥

1 A ०द्भुतां 2 A चतु
3 Tib 256b, l. 5 omits चतु 4 B चार ; Tib. l. 6 इन्द्रियबल पञ्च
5 A & Tib. add

मनःसंवरेण लभि येन विदु
ब्राह्मा विहार चतुरो निखिलान् ।
तथ शून्यतानिमित्ताप्रणिहितं च मुखं
मनःसंवरः कथितु श्रेष्ठ अयम् ॥
मनःसंवरेण लभि येन विदु
करुणाविहारु महुपेक्षु लभी ।
तथ ईर्य चर्य महमैत्रिवरां
हित चित्तु भोति स सर्व सत्त्व ॥
मनःसंवरेण युक्तो भवति

B adds
मनःसंवरेण लभि येन विदु
चतुर्ब्रह्मविहार चतुरो निखिलान् ।
शून्यानिमित्ताप्रणिहितं च मुखं
मनःसंवर कथितु श्रेष्ठ अयम् ॥
मनःसंवरेण लभि येन विदु
महुपेक्षता विहारण परम प्रवरम् ।
मनःसंवरेण विदु येन यतो
मिथ्याकुदृष्टि-सह नो वसती ॥
गुरुणां च शाठियु न स जनयी
मनःसंवरः कथितु श्रेष्ठ अयम् ।

मनःसंवरेण लघु[1] येन विदु
बोध्यङ्ग सप्त लभते विमलान्[2] ।
अष्टाङ्गिकं च तथ मार्गवरं
मनःसंवरः कथितु श्रेष्ठ अयम्[3] ॥७९॥

मनःसंवरेण लभि येन विदु
मद्रुपेक्षता[4] विहरणं प्रवरम् ।
करुणाविहारिममलं[5] च परं
मनःसंवरः कथितु श्रेष्ठ अयम् ॥८०॥

मनःसंवरेण लभि येन शिवान्[6]
क्षेमान् वितर्क विदु शुद्ध सदा[7] ।
लभते गुणाढ्यु प्रविवेककथां
मनःसंवरः कथितु श्रेष्ठ अयम् ॥८१॥

मनःसंवरेण विदु येन युतो[8]
मिथ्या कुदृष्ट्या सह न[9] वसति ।
व्यापादाभिध्या न च संजनयी
मनःसंवरः कथितु श्रेष्ठ अयम् ॥८२॥

मनःसंवरेण विदु येन युतः
कुहनां करोति न मुहूर्तमपि ।

1 B & Tib. 257a, l. 2: लभि
2 A विपुलां
3 B omits stanzas 79-82
4 C मद्रुपेक्षथा
5 A ०विहारमचलं
6 A शिवां
7 A शुद्धमनाः Tib. 257a, l. 3: shi-ba-dgaḥ-bai-yid
8 C सदा
9 A ०कुदृष्टि सह नो

गुरूणां च शाठियु[1] न संजनयी
मनःसंवरः कथितु श्रेष्ठ अयम्[2] ॥८३॥
मनःसंवरेण विदु येन युतो
रागथ द्वेष न जनेति मनः।
तथा मोह चित्तु न जनेति क्वचिन्
मनःसंवरः कथितु श्रेष्ठु अयम् ॥८४॥
मनःसंवरेण[3] विदु येन युतो
बोधाय चित्तु न[4] विनिःसृजति[5]।
अध्याशयं च न[6] विकोपयती
मनःसंवरः कथितु श्रेष्ठु अयम् ॥८५॥
मनःसंवरेण विदु येन युतो
ये चान्यदोष[7] विविधा मनसः।
सर्वेभि[8] सार्धं न [च] संवसती
मनःसंवरः कथितु श्रेष्ठु अयम् ॥८६॥
मायोपमं च मन ओतरती[9]
सुपिनोपमं तथ मरीचिसमम्[10]।

1 C करुणां च शाधियु ; see Tib. 257a, l. 6.
2 C रागेथ
3 A मनसंवरे
4 C चिन्तन
5 B ०ती
6 A न च ; C अध्याशयं मन
7 A & B चान्यि दोष
8 B सर्वेहि
9 A & C मन ओत्तरति ; B मन ओतेरति
10 B adds अथ खलु भगवान् पुनरपि चन्द्रप्रभकुमारभूतमामन्त्रयते स्म ।

प्रतिभास[1]लक्ष[ण]मथो सततं
मनःसंवरः कथितु श्रेष्ठु अयम् ॥८७॥
सुपिनोपमं च सुखमोतरती
तथनित्य शून्यत अशाश्वत[तः][2] ।
मन एव ओतरति[3] येन विदु
मनःसंवरः कथितु श्रेष्ठु अयम् ॥८८॥
निर्जीवमोतरति[4] निःसत्त्व मनो
उत्पन्नु प्रत्ययत चक्रसमम्[5] ।
न कुतश्चिदागतु न चापि [6]गतं
मनःसंवरः कथितु श्रेष्ठ अयम् ॥८९॥
न च तन्मन्ये[7] उपलभाति क्वचि
न च कल्पयत्यथ न म[न्य]त्यसौ[8] ।
नालंभते विनिविशति न चो[9]
मनःसंवरः कथितु श्रेष्ठु अयम् ॥९०॥

1 B प्रभास०
2 B असास्वततः
3 A एवमोत्तरति ; B एवमोतरि ; C उत्तरति
4 A निर्जीवतरि
5 A निर्जीवमोत्तरति निसत्त्वमना उत्पन्नु प्रभाय नलातचक्रसमं ; B नलात चक्रसमं ; Tib. 257b, l. 4: mgal. me. bskor. ba.
6 A क्वचिद्गतं
7 A तं मना ; C ततत्परो
8 A & B मन्यति सो
9 A & B नालंबते निविशाति न चो ; C ०शाति मनो

परमार्थसत्य[1] सुपिनेन समं
निर्वाण[2] स्वप्नसममोतरति[3] ।
मन एवमोतरति येन विदु
मनःसंवरः कथितु श्रेष्ठ अयम् ॥९१॥

[इति श्रीसमाधिराजे[4] कायवाङ्मनःसंवर-परिवर्तः
अष्टत्रिंशतितमः[5]] ॥३८॥

1 A ०सत्त्व
2 A निर्वाण ; C ०निर्वाहु
3 B स्वप्नसमोतरती ; C मोत्तरति
4 B drops इति श्रीसमाधिराजे
5 A मनसस्संवरपरिवर्तश्चत्वारिंशतिमः ; B कायवाक्मनःसंवरपरिवर्तो नाम चत्वारिंशतितमः। In MS. A, this chapter has been subdivided into three as कायसंवरः, वाक्संवरः and मनःसंवरः। Though MS. B followed MS. A in numbering the chapters, it, however, ended the chapter as indicated above.

ऊनचत्वारिंशपरिवर्तः

[1]तत्र कुमार कतमा कर्मविशुद्धिः। यदिदं[2] स्वप्नोपमं त्रिभवं दृष्ट्वा तत्र [3]विरागतामुत्पादयति। इयमुच्यते कर्मविशुद्धिः[4]। तत्र कतम [5]आलम्बनसमतिक्रमः। यदिदं मायोपमतां स्कन्धधात्वायतनानां बुद्ध्वा तेषां व्यवसर्गः। अयमुच्यते आलम्बन[5]-समतिक्रमः। तत्र कतमा स्कन्धपरिज्ञा। यदिदं मरीच्युपमतां स्कन्धानामवतरति[6]। तत्र कतमा धातुसमता। यदिदं निर्मितोपमानां धातूनां प्रतिनिसर्गः। तत्र कतम आयतनाप्रकर्षः[7]। यदिदं प्रतिभासोपमानामायतनानां प्रतिनिसर्गः। त०[8] तृष्णाप्रहाणम्। य०[9] सर्वधर्माणामनालम्ब[न]ता। त० अनुत्पादसाक्षात्क्रिया। य० सर्वधर्माणामनुपलब्धिः। त० क्रियावतारः। य० वीर्यसमुत्थितस्य दुःखस्याविप्रणाशः। त० हेतुदीपना[10]। य० प्रतिश्रुत्कोपमानां स्कन्धानामभिनिर्वृतिः[11]। त० फलाविप्रणाशः। य० स्वप्नोपमस्य कर्मफलस्याविप्रणाशः। त० धर्मदर्शनम्। य० सर्वधर्माणामपश्यना[12]। त० मार्गभावना। य०

1 A adds तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमेतदवोचत्।

2 A यदुतेदं

3 A विरागमुत्०

4 A, B & Tib. इयमुच्यते कुमार कर्मपरिशुद्धिः

5 Mss. आरम्बण०

6 B स्कन्धध.त्वानामवतरति

7 Tib. 258a, l. 4: sel. va=अपनय

8 त०=तत्र कतरः or कतरा or कतमा or कतरत्

9 य०=यदिदं

10 A परिदीपना

11 B निवृत्तिः

12 B & C ०पश्यनता

सर्वधर्माणामनुपलब्धिभावना। त० तथागतसमवधानम्। य० सर्वबुद्धानां शिक्षा-प्रतिपत्तिः। त० तीक्ष्णप्रज्ञता[1]। य० सर्वधर्माणा[2]मनुत्पत्तिकक्षान्तिः। त० सत्त्वानुप्रवेश[3]ज्ञानम्। य० इन्द्रियपरापरज्ञताज्ञानम्। त० धर्मज्ञानम्। य० सर्वधर्माणामनुपलब्धिः[4]। त० प्रतिसंविदावतारज्ञानम्। य० यथाभूतधर्मनयप्रवेशः[5]। त० अक्षरप्रभेदज्ञानम्। य० त्रिमन्त्रप्रयोगज्ञानम्। आकारानाकारज्ञानम्[6]। त० वस्तुसमतिक्रमः। य० अवस्तुबुध्यना[7]। त० घोषपरिज्ञा। य० प्रतिश्रुत्कोपमावतारज्ञानम्। त० प्रामोद्यप्रतिलाभः। य० सर्वधर्माणामनुपलब्धिः। संसारात् दुःखस्य उत्सर्गो भारावहरणम्[8]। त० [धर्म][9]प्रीत्यनुभवनता। य० अववाद-सन्तोषणानुत्सर्गस्वयानानुशंसा[10]पश्यना। त० आर्जवता। य० आर्यसत्यप्रतिवेधः[11]। त० रिजुकता[12]। य० ईर्यापथस्याकल्पनता[13]। त० अपगतभ्रूकुटिकता[14]। य० दोषप्रहाणम्। त० सौशील्यता[15]। य० सुखसंवासता[16]। त० माधुर्यता। य०

1 A ०प्रज्ञा
2 A ०णामनुत्पाद०
3 A & B ०प्रवेशे ; C कतमस्मिन् वानुप्रवेशे
4 A सर्वधर्माणां यथाभूतविशुद्धिज्ञानं
5 A यदिदं सर्वसत्त्व यथाशयावबोधनं ज्ञानं ; B धर्मनयप्रतिवेधः
6 A & B अकाराकारज्ञानञ्च
7 A बुध्यतां ; B ०बुध्यना
8 A निःसाराद्दुःखस्य भारामहरणं ; C भारावपारणम्
9 Tib. 259a, l. 1 adds it.
10 A ०सर्गः स जानानुशंसा ; B ०सर्गः स्वयानानुशंसा पश्यना ; C सर्गस्य सानु०
11 A & B ०सत्यप्रतिवधः
12 A & B ऋजु०
13 A & B ०पथस्याविकल्प०
14 B ०टिमूलता
15 A तत्र स खिल्यते ; B साखिल्यता ; Tib. 259a, l. 3: dge. ba
16 C संचरता

परेषु हितवस्तुता । त॰ पूर्वालापिता[1] । य॰ एहि स्वागतवचनता[2] लघूत्थानता । त॰ गुरुगौरवता । य॰ गुरूणामन्तिके भयं च कल्याणमित्रता च । त॰ गुरुशुश्रूषा । य॰ गुरूणामुपस्थानावस्थानपरिचर्या । त॰ उपपत्तिसंतुष्टिः । य॰ सर्वोपपत्तिष्वनास्वादनता[3] । त॰ [4]शुक्लधर्मातृप्तता[4] । य॰ [4]शुक्लधर्माणां पर्येष्टिः किंकुशलमार्गणता च[5] ।

त॰ आजीवपरिशुद्धिः । य॰ इतरेतरसन्तुष्टिता अकूहणता[6] अनैषिकता । लाभेन लाभाचिकीर्षणता च[7] । त॰ अरण्यवासानुत्सर्गः । य॰ [8]अनिक्षिप्तधुरता कुशलेषु धर्मेषु प्रान्तशय्यासनाभिरतिर्वनगहनगिरिदुर्गगुहाकन्दरेष्वभिरतिः धर्मप्रीत्यनुभवनता च । असंसर्गः गृहिप्रव्रजितैरभिसत्कारश्लोके नाध्यावसानता तृष्णाप्रहाण-ध्यानप्रीत्यनुभवनता च । अयमुच्यतेऽरण्यवासानुत्सर्गः । त॰ भूम्यवस्थानज्ञानम्[9] । य॰ [10]श्रावकभूमिफलव्यवस्थानज्ञानं [प्रत्येकबुद्धभूमिव्यवस्थानज्ञानं बोधिसत्त्वभूमिव्यवस्थानज्ञान] च । त॰ स्मृत्यविप्रणाशः । य॰ अनित्यदुःखशून्या-

1 A पूर्वाभिलापिता ; B ॰भिलषिता
2 A & B स्वागतवादिता
3 A सर्वोपरिप्रसादता ; B ॰पत्तिस्थानास्वादनता
4 B शुरु॰
5 The Gilgit ms. C ends here. The subsequent portion is taken from Mss. A & B.
6 B adds अलपनता
7 A लाभाविकर्षणता ; cf. Mahāvyutpatti, 127.
8 B य॰ विक्षिप्त॰
9 A ॰नुभवन तावत् सुसंगी
10 B श्रावकफल॰

नात्मामनसिकारः। त॰ स्कन्धकौशल्यज्ञानम्। य॰ स्कन्ध-धात्वायतन-[1]प्रभेदज्ञानञ्च तत्र चानुपलब्धिः। त॰ अभिज्ञा-साक्षात्क्रिया। य॰ चतुर्णामृद्धिपादानां प्रतिलम्भः ऋद्धि-विकुर्वणता च। त॰ क्लेशापकर्षः। य॰ रागद्वेषमोहप्रहाणम्। त॰ [2]वासनानुसन्धिसमुद्घातज्ञानम्। य॰ पूर्वबालचरि-विजुगुप्सनता श्रावकप्रत्येकबुद्धभूम्यस्पृहणता च। त॰ विशेषगामिता। य॰ बुद्ध-वैशारद्यप्रतिसंविदां निष्पादनता च। त॰ भावनाभिनिष्यन्दः। य॰ अनुनयप्रतिघप्रहाणम्। त॰ आपत्ति-कौशल्यम्[3]। य॰ प्रातिमोक्ष-विनयसंवरः। त॰ पर्युत्थान[4]-विष्कंभणम्। य॰ [5]अत्ययदेशना आयतिसंवरश्चाकुशलानां धर्माणाम्। त॰ अनुनयप्रहाणम्। य॰ त्रैधातुकभवतृष्णालता[6]समुद्घातोऽसमुत्पन्नानां चाकुशलानां धर्माणामनुत्पादनता। उत्पन्नानां च कुशलमूलानां[7] धर्माणामविप्रणाशः। त॰ भवसमतिक्रमः। य॰ त्रैधातुकानुपलब्धिः। अमनसिकारता च। त॰ जातिस्मरता। य॰ पूर्वेनिवासज्ञानम्। त॰ कर्म-विपाकनिष्काङ्क्षणता। य॰ उच्छेदशाश्वतविवर्जनता। त॰ धर्म-चिन्ता। य॰ यथाभूतचिन्ता। त॰ श्रुतपर्येष्टिः। य॰श्रावकप्रत्येक-बुद्धपिटकस्य बोधिसत्त्वपिटकस्य च आधारणता भावनता च। त॰

1 C अभेद

2 B वासनासु सर्वि समु॰

3 Tib. 260a, l. 4: ལྟུང་བ་ལས་འབྱིན་པ་ལ་མཁས་པ །

4 B पर्यवस्थानविष्कम्भन-विष्कम्भन'

5 A सत्यापदेशना ; B मद्ययेदेशन

6 A तृष्णाभिलाष

7 B कुशलानां

ज्ञानतीक्ष्णता। य० स्वप्नोपममनुत्पादज्ञानम्। त० ज्ञानतृष्णा। य० ज्ञानपर्येष्टिः। त० ज्ञानावबोधः। य० अनुत्तरसम्यक्संबोध्यभिनिष्पादनता च। त० [1]आजानेयभूमिः। य० बोधिसत्त्वशिक्षास्थानम्। त० शैलोपमता। य० बोधिचित्तस्यानुत्सर्गः। त० अकम्पनता। य० क्लेशैरसंहार्यता। त० अचलनता। य० सर्वनिमित्तानाममनसिकारः। त० अवैवर्त्यलक्षणम्। य० षट्पारमितानामखण्डनता। [2]अन्यलोकधातुस्थितानां बुद्धानामभीक्ष्णदर्शनता च। त० [3]कुशलधर्माभिसम्पत्[4]। य० [5]आसन्नीभावोऽनुत्तरायाः सम्यक्संबोधेः। त० पापकर्मजुगुप्सनता। य० आयतिसंवरता चानुत्पादस्य पापस्य। त० क्लेशानामसमुदाचारः। य० अविद्याया भवतृष्णायाश्च क्रोधस्य चानुत्पादनता। त० शिक्षाया अपरित्यागः। य० [6]कर्मविपाक-पत्तीयनता[7] बुद्ध-गौरवता च। त० समाधिव्यवस्थानम्। य० चित्तचैतसिकानां धर्माणाम् अनुत्पादाव्ययकौशल्यं चित्तैकाग्रता च। त० सत्त्वाशयज्ञानम्। य० इन्द्रियपरापरज्ञताज्ञानम्। त० उपपत्तिविशेषज्ञानम्।

1 B आसनेय०

2 B अनेक० ; see Tib. 260b, l. 7.

3 A शुक्ल

4 Tib. 261a, l. 1: ཆོས་ཕུན་སུམ་ཚོགས་པ །

5 A आसन्नीभूतानुत्तरयाः सम्यक्संबोधिः

6 B adds पक्षानां गतीनां व्यवस्थानज्ञानम्.

7 Tib. 261a, l. 3. Cf. Sans. प्रतीयनता। See Infra, p. 633.

य० पञ्चानां गतीनां व्यवस्थानज्ञानम्। त० ज्ञानानन्तता[1]। य० लौकिकलोकोत्तरेषु शिल्पेष्वनाभोगज्ञानम्। त० वचन-प्रतिसन्धिज्ञानम्। य० तथागतसन्धाभाष्यानुबुध्यनता। त० गृहावासपरित्यागः। य० कायचित्तविवेकाभिनिष्क्रमः। त० त्रैधातुकेऽनभिरतिः। य० त्रैधातुक-यथाभूतदर्शनता। त० चित्तस्यानवलीनता। य० चित्तस्यापरित्यागः समापद्यमाना-परित्यागश्च। त० धर्मेष्वभिनिवेशः। य० सर्वस्नेहप्रहाणम्। त० धर्मपरिग्रहः। य० बुद्धबोध्यारक्षा। एषाञ्चैव सूत्रान्तानां प्रतीच्छनता। त० धर्मगुप्तिः। य० सद्धर्मप्रतिक्षेपकाणां सह[2]धर्मेण निग्रहः। त० कर्मविपाकपत्तीयनता। य० लज्जया पापकात् कर्मणो विरतिः। कुशलधर्मपर्येष्टौ चाभियोगः। त० विनयकौशल्यम्। य० प्रकृत्यापत्त्यनापत्ति[3]-बुध्यनता च। त० अधिकरणव्युपशमः। य० गणविवर्जनता। त० अविग्रहोऽविवादः। य० लौकिक-कथा-निरर्थिकता[4]। त० क्षान्तिभूमिः। य०कायचित्तपीडाधिवास-नता। त० क्षान्तिसमादानम्। य० परतो दुरुक्तानां[5] वचनपथानामध्युपेक्षा क्षान्त्यखण्डनता च। त० धर्मप्रविचयः। य० स्कन्धधात्वायतनानां प्रभेदः। संक्लेशव्यवदानपक्षस्य च प्रभेदस्तेषां चानुपलब्धिः। त० धर्मविनिश्चयकौशल्यम्। य० सर्व-

1 A आज्ञाच्छता ; see Tib. 261a, l. 6.

2 B सर्वे

3 B प्रकृत्यानापत्ति०

4 B ०कथानर्थिकता

5 A & B add दूरागतानां

धर्माणामनभिलापः[1] । त० धर्मपदप्रभेदज्ञानम् । य० सर्वधर्माणां व्यवस्थाननिस्तीरणता । त० धर्मपदनिर्हारकौशल्यम् । य० यथाभूतानां धर्माणां निर्देशः । त० अर्थानर्थसंभेदनिर्हारकौशल्यज्ञानम् । य० धर्म-प्रकृत्यनुतक्षेपाप्रक्षेपः । त० पूर्वान्तज्ञानम् । य० हेतुज्ञानम् । त० अपरान्तज्ञानम् । य० प्रत्ययज्ञानम् । त० त्रिमण्डलपरिशुद्धिज्ञानम्[2] । य० अतीतानागतप्रत्युत्पन्नानां धर्माणामनुपलब्धिः । अमनसिकारता च । त० चित्तावस्थानम् । य० चित्तानुपलब्धिः । त० कायव्यवस्थानम् । य० कायगतानुस्मृतिः । त० [3]ईर्यापथलक्षणम् । येयमार्यधर्मासंभ्रान्तता । त० ईर्यापथस्याविकोपनता[4] । य० [5]प्रच्छन्नकल्याणता । त० ईर्यापथस्याविकल्पनता । य० विगतपापेच्छता । त० [6]इन्द्रियप्रासादिकता । य० धर्मगत[7]मनसिकारता युक्तभाणिता[8] कालज्ञता यथाभूतानां धर्माणां भूतप्रकाशनता । त० लोकज्ञता । य० अतिक्रममसंप्रजानता । त० [9]मुक्तत्यागिता । य० सतां वस्तूनामग्रहणता[10] । अमात्सर्यता च । त० प्रततपाणिता । य० संविभागशीलता । त० अगृहीतचित्तता । य० श्रद्धानाविलता । त० [11]व्यपत्रापिता । य०

1 A ०लाषः

2 A drops from यथाभूतानां up to परिशुद्धिज्ञानम् ।

3 A ऐर्या०

4 A ०कोपरता

5 B प्रतिच्छन्न०

6 A omits इन्द्रिय

7 B धर्मगति०

8 A ०भणिता

9 A & B युक्ति

10 Tib, 262b, l. 7: དངོས་པོ་རྣམས་མི་སྡུད་པ །

11 A ह्री-व्यप० ; B ह्रियापणता

अमुखरता। त॰ ह्रियापणता। य॰ अनभिमुखता[1]। त॰ अकुशलचित्तजुगुप्सनता। य॰ बालधर्मबुध्नता तैश्चासमवधानम्। त॰ धूतानवसृजनता। य॰ दृढसमादानता। त॰ चारित्रसमवधानता। य॰ चर्यापथक्रम-संजानता। त॰ प्रीतिसमुदाचारः। य॰ कुशलानां धर्माणामनुशंसाचित्तता। त॰ गुरूणामासनप्रत्युत्थानम्। य॰ निहतमानता। अनालस्यता च। त॰ मानस्य निग्रहः[2]। य॰ आत्मनोऽनुपलब्धिरनालम्बनता च। त॰ चित्तस्य संग्रहः[3]। य॰ शुक्लधर्माणामविप्रणाश[4]-ज्ञानम्। त॰ चित्तोत्साहनता। य॰ वीर्यफलाविप्रणाशज्ञानम्। त॰ अर्थप्रतिसंविज्[5]-ज्ञानम्। य॰ यथाभूतसत्यप्रतिवेधज्ञानम्। त॰ ज्ञानानुबोधः। य॰ लौकिक-लोकोत्तराणां धर्माणामनुबुध्यनता। त॰ अज्ञानविगमः। य॰ यथाभूतानां धर्माणामध्यारोपविगमः। त॰ चित्त[6]प्रवेशज्ञानम्। य॰ उत्पादव्ययज्ञानम्। त॰ आहारनिर्हारकौशल्यज्ञानम्। य॰ तीक्ष्णप्रज्ञता। त॰ रुतरवितज्ञानम्। य॰ यथाभूतधर्मप्रकाशनता। त॰ व्यवस्थानज्ञानम्। य॰ यथाभूतस्यावतारज्ञानम्। त॰ अर्थविनिश्चयः। य॰ संस्कारस्कन्धोच्छेदः। त॰

1 A & B त॰ अपत्रपणता। य॰ अव्ययकृता; Tib. 263a, l. 1:
དེ་ལ་ངོ་ཚ་ཤེས་པ་གང་ཞེ་ན། འདི་ལྟ་སྟེ། མངོན་དུ་ཕྱུར་བའོ།

2 A & B विग्रहः

3 B संप्रग्रहः; Tib. 263a, l. 5: རབ་ཏུ་བཟུང་།

4 B adds सुरूपधर्माणामविप्रणाशज्ञानम्

5 A & B ॰प्रतिसन्धिज्ञानम्

6 B चित्तस्य प्र॰

[1]अर्थानर्थविवर्जनता। य० भवसमतिक्रमः। परेषाञ्च भवसमतिक्रमणावतारणता च। त० सत्पुरुषाश्रयः। य० बुद्धा[illegible]ता। त० सत्पुरुषसमवधानम्। य० बुद्धबोधिसत्त्वप्रत्येकबुद्धश्रावकसेवनता। त० असत्पुरुषवर्जनता[2]। य० उपालम्भिकानां कुशीदानां च विवर्जनता। त० ध्यानाभिरतिः। य० कामकण्टक[3]विवर्जनता ध्यानानामनुत्सर्जनता प्रीत्यविजह्रता[4] च। त० ध्यानेष्वनध्यवसानम्। य० त्रैधातुकसमतिक्रमणच्छन्दः सत्त्वपरिपाचनाच्छन्दः। उत्तरिप्रज्ञावभासच्छन्दश्च। त० अभिज्ञाविकुर्वणता। य० पञ्चस्वभिज्ञासु स्थित्वा दुर्विज्ञेयानां बुद्धधर्माणां परेभ्यः संप्रकाशनता। त० नामसङ्केतः। य० अपरिनिष्पन्नानां नाम्नाम[नु]बुध्यनता। त० प्रज्ञप्तिव्यवहारः। य० लोकव्यवहारः। त० प्रज्ञप्तिसमुद्घातः। य० [5]प्रव्याहारज्ञानम्। त० संसारनिवृत्तिः। य० संसारदोषप्रत्यवेक्षा। त० लाभानर्थिकता। य० भूताल्पेच्छता। त० लाभसत्कारानादेयता[6]। य० अनुत्कण्ठता[7] च विगतपापेच्छता च। त० [8]अवर्णै रमंकुभावता। य० स्कन्धधातुपरीक्षाज्ञानम्। त० भूतानां वर्णानामनधिवासनता। य० प्रतिच्छन्न[9]कल्याणता च लाभसत्कारस्य चान्तरायबुध्यनता। त० सत्कारेषूपेक्षा। य० कर्मविपाकबुध्यनता। त० असत्कारेष्वमंकु-

1 B omits अर्थ
2 B omits from ०षाश्रय to ०वर्जनता
3 B omits कण्टक
4 B प्रीति अविवर्जनता च
5 A & B प्रत्याहार०
6 A ०रादीनता; B ०रादीयनता
7 B अनुत्त्रणता च
8 B अवर्णो अमंकु०
9 Tib. 264b, l. 1: དགེ་བ་མི་སྒྲུབས་པ།

भावता। य॰ योगस्यानुत्सर्जनता। त॰ निन्दायामकुप्यनता। य॰ लौकिकधर्मप्रत्यवेक्षा। त॰ प्रशंसायामुपेक्षा। य॰ कल्याणधर्मपर्येष्टिनिष्क्रमणम्। त॰ अलाभेऽलीनता[1]। य॰ [2]स्वयंकृतानां धर्माणां प्रत्यवेक्षणता। त॰ गृहिभिः सार्धमसंस्तवः। य॰ आमिषकिंचित्[3]विवर्जनता। त॰ प्रव्रजितैः सार्धमसंस्तवः। य॰ अयुक्तविवर्जनता युक्तपर्येषणता च। त॰ अगोचरविवर्जनता। य॰ पंचानां [4]निवरणानां प्रहाणम्। त॰ गोचरप्रचारः। य॰ स्मृत्युपस्थानानां भावना। त॰ आचारसंपद्। य॰ परानुरक्षा। त॰ आचारविवर्जनता। य॰ आत्मनः कल्याणधर्मानुरक्षणता। त॰ कुलानामदूषणता[6]। य॰ [7]ज्ञात्वविवर्जनता[8]। त॰ शासनरक्षा। य॰ धर्मपर्येष्टिसमादानता धर्मानुधर्मप्रतिपत्तिश्च। त॰ अल्पभाष्यता। य॰ शमथप्रतिलम्भः। त॰ मार्दवता। य॰ विपश्यनाप्रतिलम्भः। त॰ प्रतिवचन-कौशल्यम्। य॰ उत्तरप्रत्युत्तरज्ञानम्। त॰ प्रत्यर्थिकनिग्रहः। य॰ यथाभूतानां धर्माणां

1 A अलामेऽलीनवता ; B अलामेऽनवलीयनतां ; Tib. 264b, l. 4:
དེ་ལ་རྙེད་པ་མེད་ཀྱང་སེམས་འགོང་བ་མེད་པ་གང་ཞེ་ན །

2 A & B पूर्वस्वयं॰

3 A & B कि चित् कर्मवि॰

4 A & B विवरणानां

6 A & B कुशलां ; Tib. 265a, l. 1:
དེ་ལ་རིགས་སུན་པར་མི་བྱེད་པ་གང་ཞེ་ན །

7 A ज्ञात्व॰ ; Tib. 265a. l. 2: ཤེས་ཀྱི་ཁ །

8 A adds आपत्तेरुपद्धरणता

प्रकाशनता[1] व्यवस्थापनता च। उपालम्भनिग्रहश्च। त॰ काल-प्रतिक्रमः[2]। य॰ कालज्ञता[2]। त॰ पृथग्जनेष्वविश्वासः। य॰ बालधर्मदोषदर्शिता। त॰ दुःखितानामपरिभवः[3]। य॰ सर्व-सत्त्वेषु समचित्तता। त॰ दुःखितानां धनानुप्रयच्छनता। य॰ लोकामिषदानम्। त॰ दरिद्राणामनवसादनम्। य॰ परेषामन्तिके कृपाबुद्धिता। त॰ दुःशीलानामनुकम्पना[4]। य॰ परेषामापत्ते-रुद्धरणता च शीलप्रतिष्ठापनता च। त॰ हितवस्तुता। य॰ परेषामुपकारकरणता। त॰ कृपाबुद्धिता। य॰ सत्त्वानामना-गतदुःखपश्यनता। त॰ धर्मानुग्रहः। य॰ परेषां यथाभूतधर्माव-तरणता। त॰ आमिषपरित्यागः। य॰ स्कन्धपरित्यागः। परेषां [5]चामिषानुग्रहः। त॰ असंनिचयस्थानम्। य॰ आमिष-जुगुप्सनता। आरक्षादोषदर्शनता च। त॰ शीलप्रशंसा। य॰ शीलफलानुबोधः। त॰ दौःशील्यजुगुप्सनता। य॰ दौःशील्य-दोषबुध्यनता। त॰ शीलवतामकम्प्यसेवनता[6]। य॰ शीलवत्सु दुर्लभसंज्ञाज्ञानम्। त॰ [7]सर्वास्तिपरित्यागिता। य॰ कल्याणा-शयता। त॰ अध्याशयनिमन्त्रणता। य॰ परेषां सुखार्थिकता।

1 A प्रभावता ; B प्रभावनता

2 B omits it.

3 Tib. 265a, l. 6: བརྙས་པ་མེད་པ། =अवज्ञा

4 B ॰कम्पनता

5 Tib. 265b, l. 4: གཞན་ལ་ཟང་ཟིང་གིས་ཕན་འདོགས་པའི།

6 A & B ॰वतासस्राध्यसे ; Tib. 265b, l. 6: གཡོ་མེད་པར།

7 A सर्वापत्ति॰

त॰ यथोक्तकारिता। य॰कल्याणाशयसम्पद्। त॰ अभीक्ष्ण-पर्युपासनता। य॰ कुशलगवेषणपरिपृच्छनता। त॰ प्रीत्यनु-भवनता। य॰ अधिगमज्ञानं चागमज्ञानं च। त॰ दृष्टान्त-ज्ञानम्। य॰ उपमाज्ञानमववादज्ञानञ्च। त॰ पूर्वयोगकौशल्यम्। य॰ जात्यनुस्मरणता श्रुतबहुलता च। त॰ कुशलमूल-पूर्वं-गमता। य॰ बोधौ तीव्रच्छन्दता च परेषां समुत्साहनता च। त॰ उपायकौशल्यम्। य॰ प्रतिदेशनानुमोदनाध्येषणा-कुशला-नाञ्च परिणामनाकौशल्यम्। त॰ निमित्तप्रहाणम्। य॰ स्वप्नो-पमानां धर्माणां बुध्यनता च वस्तुविभावनता[1] च। त॰ संज्ञाविवर्तः। य॰ विपर्यासोत्सर्गः। त॰ वस्तुलक्षणता। य॰ अलक्षणज्ञानम्। त॰सूत्रान्ताभिनिर्हारकौशल्यम्। य॰यथाभूतानां धर्माणां कुशला-कुशलानाम् उपमावदानैः सम्प्रकाशनता। त॰ सत्यविनिश्चयः। य॰ विज्ञाननिरोधो नामरूपानुत्पत्तिश्च। त॰ विमुक्तिसाक्षात्-क्रिया। य॰ वज्रोपमसमाधेरचलनता अकुप्यनता च। त॰ एक-प्रव्याहारः[2]। य॰ [3]तीर्थ्यायतनविजुगुप्सनता चानुत्पत्तिक-ज्ञानता च[4]। त॰ वैशारद्यप्रतिलम्भः। य॰ [5]बुद्धधर्मविबुध्यनता। त॰ शीलाधिष्ठानता। य॰ कायसंवरः प्रातिमोक्षसंवरश्च। त॰

1 Tib. 266a, l. 6: དངོས་པོ་རྣམ་པར་འཇིག་པའོ།

2 Tib. 266b, l. 3: དེ་ལ་གཅིག་ཏུ་བརྗོད་པ་གང་ཞེ་ན།

3 Tib. 266b, l, 3: མུ་སྟེགས་ཅན་གྱི་གནས་སྨད་པ།

4 A ०ज्ञानञ्च

5 B ध्यानबलाधानता

समापत्त्यवतारः। य० त्रैधातुकवैराग्यता। त० प्रज्ञाप्रतिलाभः। य० सामर्थ्यज्ञानं चानुपलब्धिश्च। त० एकारामता। य० संगणिकादोषविवर्जनता च शुक्लधर्मानुत्सृजनता। त० अल्पज्ञातसंतुष्टिः[1]। य० इतरेतरसंतुष्टिः। त० चित्तस्यानाविलता। य० निवरणानां विष्कम्भणता। त० दृष्टिकृतानां विवर्जनता। य० उपालम्भदृष्टिविवर्जनता। त० धारणीप्रतिलम्भः। य० यथादृष्टानां धर्माणां यथाभूतासंगसंप्रकाशनता। त० ज्ञानावतारः। य० प्रकृतिप्रवेशः। त० स्थानम्। य० शीलस्थानम्। त० अवस्थानम्[2]। य० चित्तावस्थानम्[3]। त० प्रतिष्ठानम्। य० श्रद्धाप्रतिष्ठानम्। त० प्रतिपत्तिः। य० मार्गप्रतिपत्तिः। त० हेतुः। य० अविद्या हेतुः संसारस्य। त० युक्तिः। य० विद्या युक्तिर्मोक्षस्य। त० नयः। य० तृष्णाप्रहाणम्[4]। त० द्वारम्। य० दोषप्रहाणम्। त० मार्गः। य० अनित्यदुःखशून्यानात्मज्ञानम्। त० भूमिः। य० दशाप्रणिहितभूमिः। त० जातिविगमः। य० जात्युपच्छेदः। त० ज्ञानभूमिः। य० असंमोहः। त० अज्ञानप्रहाणम्। य० मोहप्रहाणम्। त० ज्ञानप्रतिष्ठानम्। य० अप्रतिष्ठानम्। त० योगाचारभूमिः। य० सप्तत्रिंशतां बोधिपक्षिकाणां धर्माणां भावना। त० बोधिसत्त्वगोचरः। य० षट्पारमिता। त० सत्पुरुषसंसेवना। य० बुद्धाभिनिषेविता। त० असत्पुरुष-

1 A adds here य० उपालम्भदृष्टिविवर्जनता 2 Tib. मूलस्थानम्

3 A विभावस्थानं

4 A drops two lines from मार्ग० to तृष्णा-प्रहाणम्।

विवर्जनता। य० तीर्थिकानाम् उपालम्भदृष्टिकानां विवर्जनता। त० तथागतैराख्यातः। य० बुद्धबलेषु स्थित्वा प्रकृतिज्ञानेन मोक्षः। त० बुद्धभूमिः। य० सर्वेषां कुशलानां धर्माणां प्रतिलाभिता। त० पण्डितैरनुमोदिता। य० अतीतानागतप्रत्युत्पन्नैर्बुद्धैर्भगवद्भिः श्रावकैश्चानुमोदिता। त० बालैः प्रतिक्षिप्तम्। य० सर्वबालैर्दुर्विज्ञेयम्। त० श्रावकप्रत्येकबुद्धैर्दुर्विज्ञेयम्। य० बुद्धधर्माचिन्त्यता। त० अभूमिस्तीर्थिकानाम्। य० मिथ्यामानो योगिनाम्। त० बोधिसत्त्वैः परिगृहीताः। य० दुर्लभता च महाभैषज्यता[1] च। त० दशबलैरनुबद्धम्[2]। य० कृच्छ्रयोगेन। त० देवैः पूजनीयम्। य० सर्वसुखाहारकमुपादाय। त० ब्रह्मणा वन्दनीयम्। य० सर्वमोक्षाहारकयोगेन। त० नागैर्नमस्यनीयम्। य० सर्ववासना-[3]समुत्यागतामुपादाय। त० यक्षैरनुमोदनीयम्। य० सर्वदुर्गतीनां मार्गच्छेदनतामु०[4]। त० किन्नरैः स्तवनीयम्। य० सर्वमोक्षप्रामोद्याहरणतामु०। त० महोरगैः प्रशंसनीयम्। य० संसारोच्छेदनतामु[5]०। त० बोधिसत्त्वैर्भावयितव्यम्। य० सर्वज्ञानाहारिकमु०। त० पण्डितैः पर्यवाप्तव्यम्। य० अत्रैवर्त्यभूम्याहारित्रकमु०। त० धनमनुत्तरम्। य० देवमानुषिकायाः प्रजायाः सम्पत्तेराहारित्वकं चोपादाय मोक्षाहारित्रकमु०[6]। त० दानं निरा-

1 Tib. 268a, l. 2: རྗེ་ཆེན་པོར་གྱུར་བའོ།

2 Ibid. ཁོང་དུ་ཆུད་པ།

3 B वासनासमुच्छेदतामुपादाय

4 मु०=मुपादाय

5 A drops two lines from किन्नरैः to ०च्छेदनतामु०

6 B omits मोक्षहारित्वकं

त० मुद्रा [1]सर्वधर्माणाम्। य० पारादपारमवबुध्यनतामु०। त० असंहार्यता सर्वज्ञानस्य। य० सर्वाकुशलधर्मप्रहाणाय च संवर्तते सर्वकुशलधर्माहारणतायै च [2]सर्वसत्त्वमोक्षाहरणतायै संवर्तते। त० उद्यानं बोधिसत्त्वानाम्। य० सर्वप्रीतिप्रामोद्यात्मसु[खेन] सर्वसत्त्वसुखाहरणतामु०[3]। त० विद्रापणं मारसैन्यानाम्। य० सर्वबलाहारित्वकमु० सर्वक्लेशशमनं चोपादाय। त० विद्या[4] क्षेमगामिनाम्। य० सर्वोपद्रवक्षयाय संवर्तते। त० अर्थः सिद्धानाम्। य० [5]सर्वधर्मसम्पत्त्याहारित्वकमु०। त० परित्राणममित्र[6]मध्यगतानाम्। य० सर्वोपलम्भिकानां मिथ्यादृष्टिकानां पराजयतायै संवर्तते। त० सह धर्मेण तीर्थिकानां निग्रहः। य० सह धर्मेण तीर्थिकानां निग्रहमु०। त० सत्याकारो वैशारद्यानाम्। य० सर्वधर्माकोटितप्रत्याकोटितक्षेमतामु०[7]। त० भूतपर्येष्टिर्बलानाम्। य० अविपरीतयोगेन। त० पूर्वनिमित्तमष्टादशानामावेणिकानां बुद्धधर्माणाम्। य० सर्वशुक्लधर्माहरणतामु०। त० अलङ्कारः। य० द्वात्रिंशतां महापुरुषलक्षणानामाहारकमु०। त० रतिर्मोक्षकामानाम्। य० आदिमध्यपर्यवसानकल्याणतामु०। त० [9]प्रीतिर्ज्येष्ठपुत्राणाम्।

1 A omits सर्व   2 A सर्वमोक्ष०   3 A & B ०सत्त्वासुख सर्व०
4 A विमोक्षमा०   5 A omits धर्म   6 A अमित्राण०
7 Tib. 270a, l. 1-2 : དེ་ལ་མི་འཇིགས་པའི་བདེན་པའི་རྣམ་པ་གང་ཞེ་ན། འདི་ལྟ་སྟེ། ཆོས་ཐམས་ཅད་ཡོངས་སུ་བཏགས་པ་དང༌། ཕྱིར་བཏག་པ་བཟོད་པའི་ཕྱིར་རོ།
8 A यद्रुत   9 B प्रीतिप्रामोद्य०

य० पैतृकं धनं [1]बुद्धधनानुभावाहारकमु० । त० पारिपूरिर्बुद्धज्ञानस्य । य० सर्वशुक्लधर्मानुरक्षणतामु० सर्वशुक्लधर्मानन्यपोषणाहरणतामु० । त० अभूमिः सर्वश्रावकप्रत्येकबुद्धानाम् । य० उदाराप्रमेयबुद्धधर्माहारकमु० । त० संविशुद्धिश्चित्तस्य । य० सर्वमलप्रहाणाय संवर्तते । त० परिशुद्धिः कायस्य । य० सर्व[2]ग्लानिप्रशमनतामु० । त० परिनिष्पत्तिः विमोक्षमुखानाम् । य० अनित्यदुःखशून्यानात्मशान्तप्रत्यवेक्षणतामु०[3] । त० असंक्लिष्टता रागेण । य० अमृतपदाहारिकमु० । त० विगमो दोषस्य । य० महामैत्र्याहारिकमु० । त० अभूमिर्मोहस्य । य० भूतधर्मालोकाहारकमु० । त० आगमः संज्ञानस्य । य० सर्वलौकिकलोकोत्तरकायज्ञानस्योत्पादमु० । त० उत्पादो विद्यायाः । य० सर्वयोनिशो मनसिकाराहरणतामु० । त० प्रहाणमविद्यायाः । य० सर्वयोनिशो मनसिकारविगमाय संवर्तते । त० तृप्तिर्विमुक्तिसाराणाम् । य० आर्यमाहात्म्याहरणतामु० । त० तुष्टिः समाधिसाराणाम् । य० सर्वसुखचित्तैकाग्रयाहरणतामु० । त० चक्षुर्द्रष्टुकामानाम् । य० अहंपश्यितामुपादाय । त० अभिज्ञा विकुर्वितुकामानाम् । य० अनावरणतामु० कामनीयधर्मतां चोपादाय । त० ऋद्धिरभिभवितुकामानाम् । य० सर्वधर्मविकल्पितज्ञानानावरणतामु० । त० धारणी श्रुतार्थिकानाम् । य० सर्वधर्मनिर्वाणसमतामु० । त० स्मृतेरसंप्रमोषः । य० निर्वाणालम्बनप्रकृतिव्युपशमतामु० । त० अधिष्ठानं बुद्धानाम् । य०

1 A बुद्धधर्मानु० 2 A ०ग्लान्य० 3 B ०वेक्षाहरणतामु०

अनन्ताहरणतामु० । त० उपायकौशल्यं नाथानाम्[1] । य० सर्वसुखक्षेमगमनतामु० । त० सूक्ष्मम् । य० निर्वाणालम्बनव्युपशमतामु० । त० दुर्विज्ञेयम् । य० दुःखप्रतिज्ञानतामु० । त० दुराजानताऽनभियुक्तैः[2] । य० अप्रतिलब्धपूर्वतामु० । त० विवर्तोऽक्षराणाम् । य० सर्ववाक्यकथानुपलब्धितामु० । त० दुर्विज्ञयो घोषेण । य० सर्वधर्माचिन्त्यतामु० । त० अज्ञातं विज्ञैः । य० रत्नमहार्थिकतामु० । त० ज्ञानं सुरतैः । य० सतकाराजानतामु० । त० वि[3]बुद्धमल्पेच्छैः । य० सत्काराजानतामु० । त० उद्गृहीतमारब्धवीर्यैः । य०अनिक्षिप्तधूरतामु० । त० धारितं स्मृतिमद्भिः । य० कृताविप्रणाशतामु० । त० क्षयो दुःखस्य । य० रागद्वेषमोहसंवर्तनतामु० । त० अनुत्पादः सर्वधर्माणाम् । य० सर्वविज्ञाननिरोधतामु० । त० एकनयनिर्देशः । य० सर्वभवगतिच्युत्युपपत्त्यायतनानां सर्वधर्माः स्वप्नोपमा इति सर्वधर्मानुत्पाद्यतामु० ।

अयमेषां त्रयाणां पदशतानां निर्देशो द्रष्टव्यः । अयं स उच्यते कुमार सर्वधर्मस्वभावसमताविपञ्चितो नाम समाधिः[4] ।

[इति श्रीसमाधिराजे एकोनचत्वारिंशतितमः परिवर्तः ॥३९]

1 A नामकानां ; B नामकायं ; Tib. 271a, l. 6:
མགོན་པོ་རྣམས་ཀྱི །

2 B ०जानता अभियु०

3 A प्रतिबिद्ध०

4 B adds पदं परिवर्त एकचत्वारिंशतितमः ।

चत्वारिंशपरिवर्तः

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ।

विपुला बुद्धधर्मा हि विपुलो देशितो नयः ।
विपुलं धर्मं देशित्वा विपुलाल्लँभते गुणान् ॥१॥

यथा विपुलमाकाशमेवं धर्माण लक्षणम् ।
रत्नानि विपुलान् यत्र तस्माद्वैपुल्यमुच्यते ॥२॥

विपुलाचरि सत्त्वानां विपुला तेषु देशिता[1] ।
विपुलो आगमो यस्य तस्माद्वैपुल्यमुच्यते ॥३॥

अस्मिन् खलु पुनः सर्वधर्मस्वभावसमताविपञ्चितसमाधिनिर्देशे धर्मपर्याये भाष्यमाणेऽप्रमेयैः सत्त्वैरनुत्तरायां सम्यक्संबोधौ चित्तान्युत्पादितान्यप्रमेयाश्च सत्त्वा अवैवर्तिका अभूवन्ननुत्तरायां सम्यक्संबोधौ । अप्रमेयाणाञ्च सत्त्वानां प्रत्येकबोधौ चित्तमुत्पन्नम् । अप्रमेयाणाञ्च सत्त्वानामर्हत्त्वफलसाक्षात्क्रियायां चित्तान्युत्पन्नानि। अयञ्च त्रिसाहस्रमहासाहस्रलोकधातुः षड्विकारं कम्पितः प्रकम्पितः संप्रकम्पितः । चलितः प्रचलितः संप्रचलितः । वेधितः प्रवेधितः संप्रवेधितः । क्षुभितः प्रक्षुभितः संप्रक्षुभितः । रणितः प्ररणितः संप्ररणितः । गर्जितः प्रगर्जितः संप्रगर्जितः । पूर्वा दिगवनमति पश्चिमा दिगुन्नमति । पश्चिमा दिगवनमति पूर्वा दिगुन्नमति । उत्तरा दिगुन्नमति दक्षिणा दिगवनमति । उत्तरा दिगवनमति दक्षिणा दिगुन्नमति । अन्तादवनमति

1 B देशना

मध्यादुन्नमति। मध्यादवनमति अन्तादुन्नमति। अप्रमेयस्य चावभासस्य लोके प्रादुर्भावोऽभूत्।

महच्च [1]दिव्यगन्धवर्षमभिप्रावर्षत्। देवताश्च महान्तं दिव्यं पुष्पवर्षमुत्सृजन्ति स्म। दिव्यानि च तूर्यशतसहस्राण्युपर्यन्तरीक्षे भ्रामयन्त्येवं च वाचमभाषन्त।

सुलब्धा लाभास्तेषां सत्त्वानां य इमं महाकरुणावतारं धर्मपर्यायं श्रोष्यन्ति। बहुबुद्धपर्युपासितास्ते सत्त्वा भविष्यन्ति य इमं सर्वधर्मस्वभावसमताविपंचितसमाधिं[2] पुनः पुनः श्रोष्यन्ति। श्रुत्वा च लिखिष्यन्ति उद्ग्रहीष्यन्ति धारयिष्यन्ति पर्यवाप्स्यन्ति अरणभावनया भावयिष्यन्ति बहुली करिष्यन्ति परेभ्यश्च विस्तरेण संप्रकाशयिष्यन्ति सर्वसत्त्वानां ते दक्षिणीया भविष्यन्ति।

अथ खलु भगवानायुष्मन्तमानन्दमामन्त्रयते स्म। उद्गृहीष्व त्वमानन्देमं धर्मपर्यायं धारयेत् वाचयेत् पर्यवाप्नुहि परेषाञ्च विस्तरेण संप्रकाशय। अथ खल्वायुष्माना-नन्दो भगवन्तमेतदवोचत्। को नामायं भगवन् धर्मपर्यायः। कथञ्चैनं धारयामि। भगवानाह। महाकरुणावतारो नामानन्द इदं सूत्रं धारय। सर्वधर्मसमताविपञ्चितो नाम समाधिरिति धारय। आनन्द आह। उद्गृहीतो मे भगवन्नयं धर्मपर्याय इति। इदमवोचद् भगवानात्तमनाश्चन्द्रप्रभः कुमारभूत आयुष्मांश्चानन्दस्ताश्चतस्रः पर्षदो भिक्षुभिक्षुण्युपासकोपासिका अनेके च

1 A दिव्यं गन्धवर्ष०   2 A omits विपंचित

शुद्धावासकायिका देवपुत्राः सदेवमानुषासुरगन्धर्वश्च लोको भगवतो भाषितमभ्यनन्दन्निति।

इत्यार्यसर्वधर्मस्वभावसमताविपञ्चितात् समाधेर्यथालब्धं
समाधिराजं नाम महायानसूत्रं परिवर्तो नाम
चत्वारिंशतितमं समाप्तम्[1] ॥४०॥

ये धर्मा हेतुप्रभवा हेतुस्तेषां तथागतो ह्यवदत्।
तेषां च यो निरोध एवं वादि महाश्रमणः[2] ॥

1 A परिवर्तो नामैकचत्वारिंश० ; B यथालब्धपरिवर्तो नाम द्वाचत्वारिंशतितमः समाप्तम्।

2 A adds यं देवनागनरकिन्नरदैत्यवृन्दश्चिन्तामणिं वृतमिवेति समाधिराजः।
कैवल्यदागुणमयैः कथिता मुनीन्द्रैः।
पायात्सारो विविधपुण्यनिधान वह्नीवल्लीम् ॥

ग्लौ-वह्न्यासन-नाग-विप्र-पति-गे-वै-हायने विक्रमे नेपालेव्जज दोर्म हङ्क मिलितगौरे नभोमासि च। वाताहारतिथौ कवे रहनि हंसे कर्कटेपाणिमे सान्ध्येयोगयुतेभामिथभूते गौर्यां शशिः संस्थते।

वाग्वजान्वय संभवस्य हृदमानन्दस्य प्रागात्मजो मैत्रो।
पूर्भावनोदभवोऽभमृतानन्दोपवर्गेप्सितः ॥
स्वार्थेयं हि समाधिराजमलिखन् नत्वा गुरुं श्रीघनं।
मात्राविन्दुविसर्गरेफमखिलं भ्रान्तिस्तशोध्यं सता ॥ शुभम् ॥

APPENDIX

(Vide Mahāvyutpatti)

अकुशलानि (दश)

[Ten evil deeds]

see कुशलानि

अक्षणाः (अष्टौ)

[Unhappy states]

१। नरकाः

२। तिर्यञ्चः

३। प्रेताः

४। दीर्घायुषो देवाः

५। प्रत्यन्तजनपदम्

६। इन्द्रियवैकल्यम्

७। मिथ्यादर्शनम्

८। तथागतानामनुत्पादः

अधिष्ठानानि (चत्वारि)

[Firm determination]

१। सत्याधिष्ठानम्

२। त्यागाधि०

३। उपशमाधि०

४। प्रज्ञाधि०

अप्रमाणानि (चत्वारि) (=ब्रह्मविहाराः)

[Extension of undernoted mental states to unlimited spheres]

१। मैत्री

२। करुणा

३। मुदिता

४। उपेक्षा

अभिज्ञानामानि (षट्)

[Superknowledge or superpowers]

१। दिव्यचक्षुः

२। दिव्यश्रोत्रम्

३। परस्य चेतःपर्यायज्ञानम्

४। पूर्वनिवासानुस्मृतिज्ञानम्

५। ऋद्धिविधिज्ञानम्

६। आस्रवक्षयज्ञानम्

इन्द्रियाणि (पञ्च)

[Predominating faculties]

१। श्रद्धेन्द्रियम्

२। वीर्येन्द्रियम्

३। स्मृतीन्द्रियम्

४। समाधीन्द्रियम्

५। प्रज्ञेन्द्रियम्

उपायकौशल्यम्

[Expedients resorted to by Buddhas and Bodhisattvas to impart training to the ignorant]

see पारमिता

उपोसथः

[Eight precepts observed by the laity on auspicious days]

see शिक्षापदानि

ऋद्धिपादाः (चत्वारः)

[Four means to attain miraculous powers. Exertions for concentration of intention, thought, energy and investigation]

१। छन्दसमाधिप्रहाणसंस्कारसमन्वागत-ऋद्धिपादाः

२। चित्तसमाधिप्र०

३। वीर्यसमाधिप्र०
४। मीमांसासमाधिप्र०
(cf Visuddhimagga xii)

कुशलमूलानि
[Roots of good deeds]
१। अलोभः
२। अद्वेषः (=अदोषः)
३। अमोहः

कुशलानि (दश)
[Ten good deeds]
१। त्रीणि कायसुचरितानि
प्राणातिपाताद्विरतिः
अदत्तादानाद्विरतिः
काममिथ्याचाराद्विरतिः
२। चत्वारि वाक्सुचरितानि
मृषावादात् प्रतिविरतिः
पारुष्यात् प्र०
पैशुन्यात् प्र०
संभिन्नप्रलापात् प्र०
३। त्रीणि मनःसुचरितानि
अभिध्यायाः प्रतिविरतिः
व्यापादात् प्र०
मिथ्यादृष्टेः प्र०

Opposites of these are दशाकुशलानि। See also शिक्षापदानि

तथागतबलानि
see बलानि

तथागतवैशारद्यानि
see वैशारद्यानि

धातुः (त्रिः)
[Three spheres of existence]
१। कामधातुः
२। रूपधातुः
३। अरूप(आरूप्य)धातुः

बोधिसत्त्वधारण्यः (द्वादश)
[Formula learnt by Bodhisattvas]
१। अभिषेचनी
२। ज्ञानवती
३। विशुद्धस्वरनिर्घोषा
४। अक्षयकरण्डा
५। अनन्तावर्ता
६। सागरमुद्रा
७। पद्मव्यूहा
८। असङ्गमुखप्रवेशा
९। प्रतिसंविन्निश्चयावतारा
१०। बुद्धालङ्काराधिष्ठिता
११। अनन्तवर्णा
१२। बुद्धकायवर्णपरिनिष्पत्त्यभिनिर्हारा

धूतगुणाः (द्वादश)
[Rigorous practices]
१। पांशुकुलिकः
२। त्रैचीवरिकः
३। नामन्तिकः (in Pali सपदानिको)
४। पैण्डपातिकः (पत्तपिण्डिको)
५। ऐकासनिकः
६। खलुपश्चाद्भक्तिकः
७। आरण्यकः
८। वृक्षमूलिकः
९। आभ्यवकाशिकः
१०। श्माशानिकः
११। नैषदिकः
१२। याथासंस्तरिकः

ध्यानानि (चत्वारि)
[Meditations]
१। स विविक्तं कामैर्विविक्तं पापकैरकुशलधर्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसम्पद्य विहरति।

२। स वितर्कविचाराणां व्युपशमात् अध्यात्मं संप्रसादाच्चेतसः एकोदीभावाद-वितर्कमविचारं समाधिजं प्रीतिसुखं द्वितीयं ध्यानमुपसम्पद्य विहरति।

३। स प्रीतेर्विरागादुपेक्षको विहरति स्मृतः संप्रजानन् सुखं च कायेन प्रतिसंवेदयति यत्तदार्या आचक्षते उपेक्षकः स्मृतिमान् सुखं विहरतीति निष्प्रीतिकं तृतीयं ध्यानमुप-सम्पद्य विहरति।

४। स सुखस्य च प्रहाणाद् दुःखस्य च प्रहाणात् पूर्वमेव सौमनस्यदौर्मनस्ययोरस्तं-गमाददुःखासुखम् उपेक्षास्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसम्पद्य विहरति।

नामरूपम्

[lit. name and form-mind and matter]

see स्कन्धाः (पञ्चोपादानाः)

पारमिताः (षट्)

[Perfections)

१। दानपारमिता

२। शीलपा०

३। क्षान्तिपा०

४। वीर्यपा०

५। ध्यानपा०

६। प्रज्ञापा०

(अन्याश्चतस्रः)

७। उपायकौशल्यपा०

८। प्रणिधानपा०

९। बलपा०

१०। ज्ञानपा०

प्रतिसंविदः (चत्वारः)

[Analytical knowledge]

१। धर्मप्रतिसंवित्

२। अर्थप्र०

३। निरुक्तिप्र०

४। प्रतिभानप्र०

(For Mahāyānic exposition see chaps. xxiii, xxiv)

प्रातिहार्याणि (त्रीणि)

[Extraordinary powers]

१। ऋद्धिप्रातिहार्यम्

२। आदेशनाप्रा०

३। अनुशासनीप्रा०

बलानि (पञ्च)

[Powers to be acquired for spiritual perfection]

१। श्रद्धाबलम्

२। वीर्यब०

३। स्मृतिब०

४। समाधिब०

५। प्रज्ञाब०

see इन्द्रिय

(दश तथागतबलानि)

(Powers attained by the Tathāgatas)

१। स्थानास्थानज्ञानबलम्

२। कर्मविपाकज्ञा०

३। नानाधिमुक्तिज्ञा०

४। नानाधातुज्ञा०

५। इन्द्रियवरावरज्ञा०

६। सर्वत्रगामनीप्रतिपज्ज्ञा०

७। सर्वध्यानविमोक्षसमाधिसमापत्ति-संक्लेश-व्यवदानव्युत्थानज्ञा०

८। पूर्वनिवासानुस्मृतिज्ञा०

९। च्युत्युत्पत्तिज्ञा०

१०। आस्रवक्षयज्ञा०

(दश बोधिसत्त्वबलानि)

(Powers to be acquired by Bodhisattvas)

१। आशयबलम्
२। अध्याशयब०
३। प्रयोगब०
४। प्रज्ञाब०
५। प्रणिधानब०
६। यानब०
७। चर्याब०
८। विकुर्वणब०
९। बोधिब०
१०। धर्मचक्रप्रवर्तनब०

बुद्धधर्माः (अष्टादशावेणिक)

[Attaniments of a Buddha]

१। नास्ति तथागतस्य स्खलितम्
२। नास्ति रवितम्
३। नास्ति मुषितस्मृतिः
४। नास्त्यसमाहितचित्तम्
५। नास्ति नानात्वसंज्ञा
६। नास्त्यप्रतिसंख्यायोपेक्षा
७। नास्ति छन्दहानिः
८। नास्ति वीर्यहानिः
९। नास्ति स्मृतिहानिः
१०। नास्ति समाधिहानिः
११। नास्ति प्रज्ञाया हानिः
१२। नास्ति विमुक्तिहानिः
१३। सर्वकायकर्मज्ञानपूर्वंगमं ज्ञानानु परिवर्ति
१४। सर्ववाक्कर्मज्ञानपूर्वंगमं ज्ञानानुपरिवर्ति
१५। सर्वमनःकर्मज्ञानपूर्वंगमं ज्ञानानुपरिवर्ति
१६। अतीतेऽध्वन्यसंगमप्रतिहतं ज्ञानदर्शनं प्रवर्तते
१७। अनागतेऽध्वन्यसंगमप्रतिहतं ज्ञानदर्शनं प्रवर्तते
१८। प्रत्युत्पन्नेऽध्वन्यसंगमप्रतिहतं ज्ञानदर्शनं प्रवर्तते।

बोधिपक्षीयधर्माः (सप्तत्रिंशत्)

[Thirtyseven practices pertaining to perfect knowledge]

स्मृत्युपस्थानानि ४
सम्यक्प्रहाणानि ४
ऋद्धिपादाः ४
इन्द्रियाणि ५
बलानि ५
बोध्यङ्गानि ७
मार्गनामानि ८

बोधिसत्त्वधारणी

see धारण्यः

बोधिसत्त्वबलानि

see बलानि

बोधिसत्त्ववशिता

see वशिता

बोधिसत्त्व-वैशारद्यानि

see वैशारद्यानि

बोध्यङ्गानि (सप्त)

[Seven limbs of enlightenment]

१। स्मृतिसंबोध्यङ्गम्
२। धर्मप्रविचयसं०
३। वीर्यसं०
४। प्रीतिसं०
५। प्रस्रब्धिसं०
६। समाधिसं०
७। उपेक्षासं०

ब्रह्मविहाराः

see अप्रमाणानि

मार्गनामानि (अष्ट)

[Eightfold Path]

१। सम्यग् दृष्टिः

२ । स० संकल्पः
३ । स० वाक्
४ । स० कर्मान्तः
५ । स० आजीवः
६ । स० व्यायामः
७ । स० स्मृतिः
८ । स० समाधिः

लोकधर्माः (अष्टो)

[Mundane aims and objects]

१ । लाभः
२ । अलाभः
३ । यशः
४ । अयशः
५ । निन्दा
६ । प्रशंसा
७ । सुखम्
८ । दुःखम्

वशिता (दश बोधिसत्त्व-)

[Self-restraint to be acquired by Bodhisattvas]

१ । चित्तवशिता
२ । परिष्कारव०
३ । आयुर्व०
४ । कर्मव०
५ । उपपत्तिव०
६ । अधिमुक्तिव०
७ । धर्मव०
८ । प्रणिधानव०
९ । ऋद्धिव०
१० । ज्ञानव०

विमोक्षाः (अष्टौ)

[Meditational means leading to emancipation]

१ । रूपी रूपाणि पश्यत्ययं प्रथमो विमोक्षः ।

२ । अध्यात्ममरूपसंज्ञी बहिर्धा रूपाणि पश्यत्ययं द्वितीयो विमोक्षः ।

३ । शुभं विमोक्षं कायेन साक्षात्-कृत्वोपसम्पद्य विहरत्ययं तृतीयो विमोक्षः ।

४ । स सर्वशो रूपसंज्ञानां समतिक्रमात् प्रतिघसंज्ञानां अस्तंगमात् नानात्वसंज्ञानाम-मनसिकारादनन्तमाकाशमित्याकाशानन्त्यायत-नमुपसम्पद्य विहरत्ययं चतुर्थो विमोक्षः ।

५ । स सर्वश आकाशानन्त्यायतनं समतिक्रम्यानन्तं विज्ञानमिति विज्ञानानन्त्या-यतनमुपसम्पद्य विहरत्ययं पञ्चमो विमोक्षः ।

६ । स सर्वशो विज्ञानानन्त्यायतनं समतिक्रम्य नास्ति किञ्चिदित्याकिञ्चन्यायतन-मुपसम्पद्य विहरत्ययं षष्ठो विमोक्षः ।

७ । स सर्वश आकिञ्चन्यायतनं समतिक्रम्य नैवसंज्ञानासंज्ञायतनमुपसम्पद्य विहरत्ययं सप्तमो विमोक्षः ।

८ । स सर्वशो नैवसंज्ञानासंज्ञायतनं समतिक्रम्य संज्ञावेदितनिरोधं कायेन साक्षात्-कृत्वोपसम्पद्य विहरत्ययमष्टमो विमोक्षः ।

see समापत्तिनामानि

विमोक्षमुखानि (त्रीणि)

[Steps leading to emancipation]

१ । शून्यता
२ । अनिमित्तम्
३ । अप्रणिहितम्

see p. 407 : विमोक्षद्वार

वैशारद्यानि (चत्वारि बोधिसत्त्वानाम्)

[Absence of fear due to self-reliance]

१ । धारणीश्रुतोद्ग्रहणार्थनिर्देशवैशारद्यम्
२ । नैरात्म्याधिगमात् परविहेठना-निमित्त-

समुदाचारसहजानधिगतेर्यापथ-त्रिष्कर्म-
परिशुद्ध-महारत्नसम्पन्नवैशारद्यम्

३। सदोद्गृहीतधर्माविस्मरणप्रज्ञोपायनिष्ठा-
गतसत्त्वनिस्तारणप्रसादसंदर्शनशुभान-
न्तरायिकवैशारद्यम्

४। सर्वज्ञताचित्तासंप्रमोषान्ययानानिर्याण-
सम्पूर्णवशितासर्वप्रकारसत्त्वार्थसंप्रापण-
वैशारद्यम्

वैशारद्यानि (चत्वारि तथागतस्य)

१। सर्वधर्माभिसम्बोधिवैशारद्यम्
२। सर्वास्रवक्षयज्ञानवै०
३। अन्तरायिकधर्मानन्यथात्वनिश्चित-
व्याकरणवै०
४। सर्वसंपदधिगमाय नैर्याणिकप्रतिपत्-
तथात्ववै०

शिक्षापदानि (अष्टौ)

[Moral precepts]

१। प्राणातिपातविरतिः
२। अदत्तादानवि०
३। अब्रह्मचर्यवि०
४। मृषावादवि०
५। मद्यपानवि०
६। गन्धमाल्यविलेपनवर्णकधारणवि०
७। उच्चशयन-महाशयनवि०
८। विकालभोजनवि०

शिक्षापदानि (दश)

[The above eight and the following
two:]

९। नृत्यगीतवादितादिदर्शनविरतिः
१०। जातरूपरजतग्रहणविरतिः

see also कुशलमूलानि

समापत्तिनामानि

[Higher meditations]

see विमोक्षाः 4, 5, 6, 7

सम्यक्प्रहाणानि (चत्वारि)

[Four right exertions]

१। अनुत्पन्नानां पापकानामकुशलानां धर्माणामनुत्पादाय च्छन्दं जनयति।

२। उत्पन्नानां पापकानामकुशलानां धर्माणां प्रहाणाय च्छन्दं जनयति।

३। अनुत्पन्नानां कुशलानां धर्माणामुत्पादाय च्छन्दं जनयति।

४। उत्पन्नानां कुशलानां धर्माणां स्थितये भूयोभावतायै असंप्रमोषाय परिपूर्णाय च्छन्दं जनयति।

स्कन्धाः (असमसमाः पञ्च)

[Group of excellent practices]

१। शीलस्कन्धः
२। समाधिस्क०
३। प्रज्ञास्क०
४। विमुक्तिस्क०
५। विमुक्तिज्ञानदर्शनस्क०

स्कन्धाः (पञ्चोपादानाः)

[Group of constituents]

१। रूपस्क०
२। वेदनास्क०
३। संज्ञास्क०
४। संस्कारस्क०
५। विज्ञानस्क०

स्मृत्युपस्थानानि (चत्वारि)

[Four types of contem-
plation through awareness]

१। कायस्मृत्युपस्थानम्
२। वेदनास्मृ०
३। चित्तस्मृ०
४। धर्मस्मृ०

स्वराङ्ग नामानि (षष्टिः)

[Sixty kinds of sweet voices]

see Mahāvyutpatti xx

INDEX